॥ श्रीजिनाय नमः ॥

# ॥ श्रीदानप्रकाशः ॥

( कर्ता श्रीकनककुशलगणी )

छपावी प्रसिद्ध करनार

पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

वीरसंवत्—२४३७. विक्रमसंवत्—१९६७. सने १९११

किं रु. १–६–०

जामनगर श्रीजैनभास्करोदयछापखानामां छप्युं.

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीदानप्रकाशः प्रारभ्यते ॥

( कर्ता कनककुशलगणी )

छपावी प्रसिद्ध करनार पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीपार्श्वः पार्श्वयक्षाद्यैः । सततं सेवितक्रमः ॥ भद्रं ददातु भव्यानां । विघ्नव्रातविनाशकृत ॥ १ ॥ कराले कलिकालेऽपि । माहात्म्यं यस्य राजते ॥ चमत्कारकरं नृणामग्नेस्तेजो यथा निशि ॥ २ ॥ गुरुकूपः स जयतात । सर्वेषामुपकारकः ॥ श्रुततोयं यतो लेभे । मया तृष्णाछिदं मुदा ॥ ३ ॥ दानशीलतपोभाव–भेदैर्धर्मश्चतुर्विधः ॥ भवाब्धियानपात्राभः । प्रोक्तोऽर्हद्भिः कृपापरैः ॥ ४ ॥ तत्रापि प्रवरं दानं । सौभाग्यारोग्यदायकं ॥ कीर्तिनिर्बंधनं सर्व–संपदां परमास्पदं ॥ ५ ॥ हे शील चंद्रकरलील भवांबुरा-

शि–निस्तारणेऽप तपः शृणु भावने त्वं ॥ एकस्य मुक्तिरभवद्भवतां प्रसादा–द्दानात्तु दा-
तुरपरस्य च मोक्षमार्गः ॥ ६ ॥ शीलादयोऽपि सत्पात्र–दानस्यायांति सन्निधौ ॥ मांड-
लिकाः सदायांति । राजराजे निमंत्रिते ॥ ७ ॥ हिंसादिविरतः साधु–रुत्तमं पात्रमीरितं
॥ तस्मै देयं वसत्यादि–दानं श्रद्धावता वरं ॥ ८ ॥ वसहिसयणासणभत्त–पाणभेसज्ज-
वत्थपत्ताइ ॥ जइवि न पज्जत्तधणो । थोवावि हु थोवयं देइ ॥ ९ ॥ पशुभिः प्रमदा-
भिश्च । षंढैश्च परिवर्जिता ॥ स्वाध्याययोग्या वसति–र्जिनैरुक्तानगारिणां ॥ १० ॥ मंत्रि-
णः कुरुचंद्रस्य । प्रोच्यते वसतौ कथा ॥ भूतलेऽखिलभव्यानां । प्रतिबोधविधायिनी ॥
॥११॥ जंबूद्वीपेऽत्र भरते । ऋद्धिभिर्भरितेऽभितः ॥ कुणालदेशो देशानां । मंडनं संप-
दां पदं ॥ १२ ॥ तत्रास्ति विश्रुता विश्वे । श्रावस्ती नगरी वरा ॥ रत्ननिर्माणवररत्नाना–
मर्हच्चैत्यविभूषिता ॥ १३ ॥ तत्राभूद्भूपतिर्भूरि–गुणानामेकमंदिरं ॥ श्रीमानादिवराहा-
ख्यो । विक्रमी विनयी नयी ॥ १४ ॥ शठदमनमशठपालन–माश्रितभरणं च राजचि-

ह्वानि ॥ अभिषेकपट्टबंधौ । वालव्यजनं व्रणस्यापि ॥ १५ ॥ तस्य प्राणप्रिया चारु—
शीलालंकरणा सदा ॥ राज्ञी कनकमालेति । नाम्नाभूद्भुवनोत्तमा ॥ १६ ॥ ताराचंद्रस्त-
योरासी—द्गुणरत्नोदधिः सुतः ॥ पितुः प्रियः स एवासी—द्बहुपुत्रेषु सत्स्वपि ॥ १७ ॥ इतो
ऽन्येद्युर्विमाता स्व—पुत्रराज्याभिलाषुका ॥ ताराचंद्रस्य भक्ष्यांत—श्चूर्णं चिक्षेप दुष्टधीः ॥
॥ १८ ॥ तत्प्रभावेण तस्याभू—द्व्याधिः पीडाकरो भृशं ॥ ततो विरूपो जज्ञेऽसौ । धि-
ग्विमातुर्विचेष्टितं ॥ १९ ॥ अत्युद्वेगं दधच्चित्ते । नक्तं निर्गत्य मंदिरात् ॥ पूर्वां दिशं स-
मुद्दिश्य । स चचाल करालरुक् ॥ २० ॥ गच्छन् क्रमेण स प्राप । सम्मेतगिरिसन्निधिं
॥ शुश्रावेति च माहात्म्यं । तस्य विद्वज्जनाननात ॥ २१ ॥ विंशत्या तीर्थकरै—रजिता-
द्यैर्यत्र शिवपदं प्राप्तं ॥ देवकृतस्तूपगणः । स जयति सम्मेतगिरिनाथः ॥ २२ ॥ श्रुत्वे-
ति तीर्थमाहात्म्यं । हर्षपूरितमानसः ॥ तमारुरोह शैलेंद्रं । ताराचंद्रो धियां निधिः ॥२३॥
तत्राजितादिदेवानां । पादुकाः प्रणनाम सः ॥ पुष्पादिभिश्च संपूज्य । स्तोतुमेवं प्रच-

क्रमे ॥ २४ ॥ दर्शनेन जिनेंद्राणां । साधूनां वंदनेन च ॥ न तिष्ठति चिरं पापं । छि-
द्रहस्ते यथोदकं ॥ २५ ॥ अद्य प्रक्षालितं गात्रं । नेत्रे च विमलीकृते ॥ मुक्तोऽहं सर्व-
पापेभ्यो । जिनेंद्र तव दर्शनात् ॥ २६ ॥ इति स्तुत्वा च नत्वा च । सद्भक्त्या श्रीमद-
र्हतः ॥ धन्यं मेने स आत्मान-मानंदभरमेदुरं ॥ २७ ॥ मर्तुकामस्ततोऽत्युच्चैः—शिखरं
सोऽधिरूढवान् ॥ तत्रापि चैक्षिष्ट मुनिं । कायोत्सर्गे स्थितं तदा ॥ २८ ॥ निर्ग्रंथमेनमा-
नम्य । पुनाम्यात्मानमंजसा ॥ स्वाधीनं मरणं चास्ती-त्येवं संचिंत्य चेतसा ॥ २९ ॥
एत्य सोंतिकमानंदा-त्ताराचंद्रो महामनाः ॥ विधिना प्रतिमास्थस्य । ननाम चरणौ मु-
नेः ॥ ३० ॥ युगलं ॥

तस्मिंश्च समये तत्र । विद्याभृद्युगलं मुदा ॥ समेत्य मुनिवर्य तं । नत्वा पृथ्व्या-
मुपाविशत् ॥ ३१ ॥ ताराचंद्रस्ततः प्रोचे । भो समेतौ कुतो युवां ॥ किमर्थमिति तेनो-
क्ते-ऽवददेको विदां वरः ॥ ३२ ॥ वैताढ्यस्योत्तरश्रेण्या । विद्याधरशिरोमणिः ॥ सिद्धा-

नेकमहाविद्यो । विद्युद्वेगाभिधः सुधीः ॥ ३३ ॥ यौवनेऽपि महद्राज्यं । त्यक्त्वा वैराग्य-
वानसौ ॥ दीक्षां प्रपद्य शुद्धात्मा । तपस्तप्रति दुस्तपं ॥ ३४ ॥ युग्मं ॥ तपःप्रभावतश्चा-
स्यो-त्पेदिरे बहुलब्धयः ॥ कफविड्रुएमलामर्श-सर्वौषध्यादिकाः खलु ॥३५॥ यद् दूरं यद्
दुराराध्यं । यच्च दूरे व्यवस्थितं ॥ तत्सर्वं तपसा साध्यं । तपो हि दुरतिक्रमं ॥ ३६ ॥ पा-
दौ तदस्य शिरसा । यः स्पृशेद्भक्तिपूर्वकं ॥ नश्यंति दूरतस्तस्य । रोगाः सर्वेऽपि देहतः
॥३७॥ ततोऽस्य सन्मुनेरावां । वंदनार्थमिहागतौ ॥ वैताढ्यपर्वताद्भद्र । को गुणैर्न हि र-
ज्यते ॥ ३८ ॥ यतः—गुणेष्वेवादरः कार्यः । किमाटोपैः प्रयोजनं ॥ विक्रियंते न घं-
टाभि-र्गावः क्षीरविवर्जिताः ॥३९॥ ताराचंद्र इति श्रुत्वा । वचो विद्याधरोदितं ॥ भाव-
तः स्वोत्तमांगेन । स्पृशतिस्म मुनेः पदं ॥ ४० ॥ मुनेः प्रभावतस्तस्य । रोगो दूरं ययौ
जवात् ॥ दरिद्रस्येव दारिद्र्यं । चिंतामणिसमागमात् ॥ ४१ ॥

सुवर्णवर्णं सौवांग-माधिव्याधिविवर्जितं ॥ दृष्ट्वातिहृष्टश्चित्तेऽसा-विति चिंतितवान्-

दान-
प्रकाराः
॥ ६ ॥

लं ॥ ४२ ॥ अहो मुनेः प्रभावोऽयं । विश्वविस्मयकारकः ॥ लोके तीर्थकरस्येव । य-
था कल्पद्रुमस्य वा ॥ ४३ ॥ इति चिंतापरं सेवा-निरतं विरतं मदात् ॥ तं धर्मयोग्यं
विज्ञाया-शेषजंतुकृपापरः ॥ ४४ ॥ कायोत्सर्गं पारयित्वा । साधुराड् धर्मदेशनां ॥ ददा
विति भवांभोधि-निस्तारणमहातरीं ॥ ४५ ॥ यथा—मस्तकस्थायिनं मृत्युं । यदि प
श्येदयं जनः ॥ आहारोऽपि न रोचेत । किमुताकृत्यकारिता ॥ ४६ ॥ गृहीत इव के-
शेषु । मृत्युना धर्ममाचरेत् ॥ अजरामरवत्प्राज्ञो । विद्यामर्थं च चिंतयेत् ॥ ४७ ॥ स-
म्यक्त्वमूलानि पंचा-णुव्रतानि गुणास्त्रयः ॥ शिक्षापदानि चत्वारि । व्रतानि गृहमेधिनां
॥ ४८ ॥ इत्यादिदेशनां श्रुत्वा । ताराचंद्रो धियां निधिः ॥ धर्मं द्वादशधा साधोः । स-
मीपे प्रतिपन्नवान् ॥ ४९ ॥ तस्य स्थैर्यं जैनधर्मे । कृत्वा श्लाघादिहेतुभिः ॥ भूयोऽपि प्र-
तिपेदेऽसौ । कायोत्सर्गं मुमुक्षुराट् ॥ ५० ॥ अयं साधर्मिक इति । ज्ञात्वा विद्याधराधि-
पः ॥ परोपकारप्रवीण—स्ताराचंद्रं जगाविति ॥ ५१ ॥

भद्र त्वमेनां गुटिकां । गृहाण महिमाद्भुतां ॥ एतस्यां भक्षितायां हि । यद्भवेदथ तत् शृणु ॥ ५२ ॥ रिपुप्रयुक्ता निःशेष-विषकार्मणमुख्यकाः ॥ दोषाः कदापि नो देहं । प्रभवंति नृणां क्षितौ ॥ ५३ ॥ इति विद्याभृता प्रोच्य । प्रदत्ता गुटिकोत्तमा ॥ तारा चंद्रेण सा सद्यो । भक्षिता बुद्धिशालिना ॥ ५४ ॥ मुनिं नत्वा समुत्तीर्य । गिरितः स धरां भ्रमन् ॥ पश्चिमांबुधितीरस्थ-मगाद्रत्नपुरं पुरं ॥ ५५ ॥ लावण्यधनमंजूषा । रूपसंपज्जितोर्वशी ॥ नाम्ना मदनमंजूषा । तत्रास्ति गणिकोत्तमा ॥ ५६ ॥ पुरे भ्रमंतं तं वीक्ष्य । रूपनिर्जितमन्मथं ॥ साब्रवीन्मातरेनं त्व-मानयात्मगृहे वरं ॥ ५७ ॥ अन्यथैतद्वियोगेन । प्राणांस्त्यक्ष्यामि निश्चितं ॥ श्रुत्वेत्यक्का तमभ्यर्थ्य । स्वसद्मनि समानयत् ॥ ॥ ५८ ॥ सुरूपं गुणिनं वीरं । प्राप्तरेखं नरेष्वपि ॥ लावण्यललनाश्लिष्टं । शुभमग्रेसरं जने ॥ ५९ ॥ ताराचंद्रं निरीक्ष्योच्चै-र्मुदिता गणिकाभवत ॥ मनोऽभीष्टं समासाद्य । को हि माद्यति न स्फुटं ॥ ६० ॥ युग्मं ॥ विललास तया सार्धं । सोऽपि प्रमोदनिर्भरः

॥ प्राप्तसर्वेंद्रियसुखो । दोगुंदक इवामरः ॥ ६१ ॥ अन्येद्युस्तनयां प्रोचे । कुट्टिनी कपटे पटुः ॥ मुग्धे त्वमेनं निर्द्रव्यं । त्यज धर्मोऽयमेव नः ॥ ६२॥ यतः—इच्छइ एगं अन्नं । अन्नं गहिऊण वंछए मुक्कं ॥ परलोए देइ दिट्ठिं । वेसा खु साहुसारिच्छा ॥ ६३ ॥ सुप्तो मृतानां त्राता स्या-न्निर्धनः पण्ययोषितां ॥ रुदादनमसत्यस्य । त्राता लोकैर्निगद्यते ॥ ६४ ॥ भुजंगेभ्यः समादत्ते । वेश्यालोको घनं धनं ॥ यथा पांथजनः कूपा-त्सतृष्णः सलिलं बहु ॥ ६५ ॥ प्रत्युत स्वं धनं त्वं तु । निष्फलस्यास्य संततं ॥ प्रयच्छसि महामूढे । निर्वाणाग्नेरिवाहुतिं ॥ ६६ ॥

निर्धनस्य शबस्येव । पुत्रि निष्कासनं वरं ॥ चिरस्थितिस्तु स्यात्तस्या-स्माकं लाघवहेतवे ॥ ६७ ॥ सधनाः कुष्टिनोऽपि स्युः । पूज्या नः स्थितिरीदृशी ॥ त्याज्याश्च निर्धनाः सर्वे । सुरूपा अपि दूरतः ॥ ६८ ॥ यतः—कस्तूरिका कुरूपापि । मान्या सुरभिगंधतः ॥ मनोज्ञमपि किंपाक-फलं त्याज्यं मृतिप्रदं ॥ ६९ ॥ इच्छं वचनमकाया । नि-

शम्य गणिकावदत् ॥ मातरस्ति प्रभूतं नः । स्वर्णादिद्रविणं गृहे ॥ १० ॥ अभियोग-
वतां नॄणां । सुप्रापं द्रविणं भवेत् ॥ नररत्नैकसंयोगः । पृथिव्यां तु सुदुर्लभः ॥ ११ ॥
अभीष्टजनसंयोगं । विना द्रव्यं हि निष्फलं ॥ कुलांगनायाः शृंगारो । विनैव रमणं नि-
जं ॥ १२ ॥ इति पुत्रीवचः श्रुत्वा । सा चक्रे मौनमंजसा ॥ प्रतीक्षमाणा समयं । कु-
ट्टिनी कपटोत्कटा ॥ १३ ॥ सान्यदा प्रददौ तस्य । विषं पंचत्वकारकं ॥ तांबूलमध्ये प्र-
क्षिप्तः । किं न कुर्वंति योषितः ॥ १४ ॥ विद्याधरप्रदत्ताया । गुटिकायाः प्रभावतः ॥
नाऽशकद्विषमेतस्य । विकारं कर्तुमर्त्तिदं ॥ १५ ॥ मणीनामौषधीनां च । मंत्राणां सुस-
दामपि ॥ अचिंत्यो महिमाभाणि । विद्वद्भिर्जगतीतले ॥ १६ ॥ व्यर्थश्रमा पुनरपि । सा
दध्यौ दुष्टधीरिदं ॥ विधाय कार्मणं दुष्टं । भ्रष्टरूपं करोमि तं ॥ १७ ॥ यथा मदनमंजू-
षा । त्यजेद्रूपविवर्जितं ॥ ताराचंद्रं गतगंधं । भ्रमरः कुसुमं यथा ॥ १८ ॥
चिंतयित्वेति द्राक् चक्रे । कार्मणं तस्य कुट्टिनी ॥ व्यर्थं बभूव तदपि । गुटिका-

याः प्रभावतः ॥ ७९ ॥ भृशं विषण्णहृदयां । चिंताम्लानमुखांबुजां ॥ हस्तविन्यस्तगंडां तां । दृष्ट्वा सोऽवोचदुच्चकैः ॥ ८० ॥ अंब केयमवस्था ते । विरूपा दुःखलक्षणा ॥ सावदपन्नद्र दुःखस्य । निदानं कथयामि ते ॥८१॥ नित्यं रते प्रसक्तिस्ते । बलक्षयविधायिनी ॥ संत्यक्तापरकार्यस्य । नैव युक्ता धियां निधे ॥ ८२ ॥ रताद् दृढशरीराणां । बलहानिः सुदुस्सहा ॥ भवंति च महारोगाः । शरीरानर्थकारकाः ॥ ८३ ॥ यतः—कंपः स्वेदः श्रमो मूर्छा । भ्रमिर्ग्लानिर्बलक्षयः ॥ राजयक्ष्मादिरोगाश्च । भवेयुर्मैथुनोत्थिताः ॥ ॥ ८४ ॥ किं पुनः कदलीगर्भ—समस्य वपुषस्तव ॥ इति चिंतापराया मे । त्वदीयार्तिर्विबाधते ॥ ८५ ॥ अतः कदाचिन्नगर—रामणीयकवीक्षणैः ॥ राजमार्गादिगमनैः । काननक्रीडनैस्तथा ॥ ८६ ॥ शास्त्राणां श्रवणैश्चापि । कलानां शिक्षणैः पुनः ॥ विनोदः क्रियतामित्या—दिभिः प्रतिदिनं त्वया ॥ ८७ ॥ यतः—

गीतशास्त्रविनोदेन । कालो गच्छति धीमतां ॥ व्यसनेन हि मूर्खाणां । निद्रया

दान-
प्रकाशः
॥ ११ ॥

कुलहेन वा ॥ ७७ ॥ प्रतिपन्नमृजुत्वेन । तद्वचस्तेन सादरं ॥ समये स स्त्रिया प्रोक्तः ।
शृणु नाथ वचो मम ॥ ७९ ॥ कुटिन्या गदितं वाक्यं । सर्वं कपटचेष्टितं ॥ अवेहि स्वे-
च्छया तत्त्व-मिह तिष्ट यथा सुखं ॥ ७० ॥ ततस्तं पूर्वरीत्यैव । तिष्टंतं वीक्ष्य चेतसि ॥
तयेति चिंतितमसौ । विषादीनामगोचरः ॥ ७१ ॥ हन्यते यदिवास्त्रेण । तीक्ष्णेनायं न-
नरो मया ॥ न जीवति तदा पुत्री । स्नेहपाशनियंत्रिता ॥ ७२ ॥ इत्यादिचिंताकुलि-
त-चेतस्का कुट्टिनी सदा ॥ बभ्रामारामनद्यब्धि-सरस्स्वरतितस्तदा ॥ ७३ ॥ दृष्टं समु-
द्रतीरस्थं । यानपात्रं तयान्यदा ॥ देशांतरात्समायातं । भूरिलोकसमन्वितं ॥ ७४ ॥ त-
या पृष्टश्च तद्वृत्तं । कोऽप्याख्यद्विदुरो नरः ॥ दूरदेशांतरादेत-द्वोहित्थं समुपागतं ॥ ७५ ॥
अद्यैव जलधौ चैत-च्चलिष्यति शुभाशये ॥ श्रुत्वेति वचनं तस्य । साभवद्धर्षपूरिता ॥
॥ ७६ ॥ अहो मे कृतपुण्यायाः । संपूर्णोऽद्य मनोरथः ॥ नक्तमारोपयिष्यामि । तं सुप्तं
वाहने जवात् ॥ ७७ ॥ सा विमृश्येति तं पोत-पतिं प्रोवाच सादरं ॥ आयामि सखुता

सार्धं । त्वया चेद्वक्ति सार्थपः ॥ ९८ ॥ सार्थपोऽप्यवदन्मात—र्नेतं पोतश्चलिष्यति ॥
तदा त्वया समेतव्यं । नात्र कार्या विशारणा ॥ ९९ ॥
तद्वचः प्रतिपद्याथ । सा गता निजमंदिरे ॥ क्रमेण रजनी जज्ञे । उष्टानामिष्टदा-
यिनी ॥ १०० ॥ ताराचंद्रं रतश्रांतं । सुप्तं निर्भरनिद्रया ॥ मध्यरात्रावथोत्पाट्य । चेटि-
भिस्तं समंचकं ॥ १ ॥ अक्का प्रहृष्टचेतस्का । गत्वा सागररोधसि ॥ मुमोच वाहने स-
द्यः । स्वपुण्यमिव मूर्तिमत् ॥ २ ॥ युग्मं ॥ ततः सा सार्थपं स्माहे—त्यायातास्मि सुता-
न्विता ॥ सोऽप्याचष्टेति शिष्टात्मा । मातः साधु कृतं त्वया ॥ ३ ॥ वंचयित्वाथ सा दृष्टिं
। सार्थपस्य महात्मनः ॥ जगाम स्वगृहं हर्षो—त्कर्षसंपूर्णमानसा ॥ ४ ॥ अथ पाथोनि-
धौ यान—पात्रं पवनवेगतः ॥ चचाल पण्यसंघातै—र्लोकैश्च परिपूरितं ॥ ५ ॥ ततः प्र-
भाते संजाते । निद्राव्यपगमादिह ॥ ताराचंद्रो जजागार । श्रुत्वा लोकारवं क्षणात् ॥
॥ ६ ॥ आत्मानं पोतमध्यस्थं । चांबुधिं वीक्ष्य विस्मितः ॥ स दध्यौ दुष्टया कृत्यं । म-

मैतद्विहितं तया ॥ ७ ॥ महिलाजनविश्वस्तो । निधानं याति मानवः ॥ पुण्योदयेन केनापि । तदद्य मम नाभवत् ॥ ८ ॥ यतः—

अनुचितकर्मारंभः । स्वजनविरोधो बलीयसि स्पर्धा ॥ प्रमदाजनविश्वासो । मृत्युद्वाराणि चत्वारि ॥ ९ ॥ इति चिंतां प्रकुर्वाणो । दृष्टो नौनायकेन सः ॥ बालमित्रकुरुचंद्रा-भिधानेन स संभ्रमात् ॥ १० ॥ प्रत्यभिज्ञाय चानंदा-दालिलिंग स तं जवात् ॥ इष्टे दृष्टे हि कस्य स्या-न्न प्रमोदभरो भुवि ॥ ११ ॥ कुरुचंद्रोऽवदद्भ्रातः । कुतोऽत्रागमनं तव ॥ कथं रोगविनिर्मुक्तं । तव चाभूदिदं वपुः ॥ १२ ॥ श्रावस्तीतो विनिर्गत्य । चिरं कुत्र स्थितोऽसि भोः ॥ इत्यादिसर्वं वृत्तांतं । त्वमाख्याहि मम स्फुटं ॥ १३ ॥ तेन पृष्टोऽवदत्तारा—चंद्रो नगरनिर्गमात् ॥ आरभ्य सकलां वार्तां । किं गोप्यं सुहृदः पुरः ॥ ॥ १४ ॥ यतः—ददाति प्रतिगृह्णाति । गुह्यमाख्याति पृच्छति ॥ भुंक्ते भोजयते चैव । षड्विधं प्रीतिलक्षणं ॥ १५ ॥ पृष्टं च ताराचंद्रेण । मित्र त्वं क्व गमिष्यसि ॥ तातो मे

दान-
प्रकाशः

॥ १४ ॥

कुशली चास्ति । कच्चिल्लोकः प्रमोदभाक् ॥ १६ ॥ कुरुचंद्रो जगादैवं । शृणु वाक्यं मयोदितं ॥ विलोकनाय ते मित्र । राजादेशादिहागमं ॥ १७ ॥ श्रावस्त्यां सर्वलोकानां । समाधानं हि वर्तते ॥ मुक्त्वैकं वसुधाधीशं । त्वद्वियोगव्यथार्दितं ॥ १८ ॥ आरभ्य तद्दिनाद्राज्ञा । प्रेषिताः संति पूरुषाः ॥ बहुशो दिक्षु सर्वासु । त्वदन्वेषणहेतवे ॥ १९ ॥ अतर्कितमभूदद्य । मम त्वद्दर्शनं वरं ॥ अभ्रं विना यथा वृष्टि-रुत पुष्पं विना फलं ॥ ॥ २० ॥ सफलोऽयं प्रयासो मे । मिलनेन सुहृत्तव ॥ घनस्य वर्षणेनेव । हलिश्रम इवाभवत ॥ २१ ॥ इतश्च वासभवने । ताराचंद्रमपश्यति ॥ प्रियं मदनमंजूषा । प्रवृत्ता रोदितुं तदा ॥ २२ ॥

दीनामेकाकिनीं भक्ता-मनन्यशरणां रतां ॥ नाथ सर्वगुणाधार । त्यक्त्वा मां किं गतोऽसि हा ॥ २३ ॥ सुरूपा बहवः संति । पुमांसो जगतीतले ॥ त्वय्येव मे स्थितं चित्तं । जातौ भृंगव्रजो यथा ॥ २४ ॥ यतः—अस्ति यद्यपि सर्वत्र । नीरं नीरजराजितं ॥

दान-
प्रकाशः

॥ १५ ॥

रमते नैव हंसस्य । मानसं मानसं विना ॥ २५ ॥ इति तदुदितं श्रुत्वा । गोपयित्वा विभूषणं ॥ बन्नाण कुट्टिनी वत्से । किं रोदिषि वचो वद ॥ २६ ॥ सावदन्नयनानंद-दायकं निजवल्लभं ॥ ताराचंद्रं न पश्यामि । मच्चित्तधनतस्करं ॥ २७ ॥ ततश्च कुट्टिनी-सर्वं । गेहमालोक्य कैतवात् ॥ अब्रवीत्पुत्रि किं रत्ना-लंकारो दृश्यते न हि ॥ २८ ॥

तन्मन्ये तं गृहीत्वासौ । नष्टः क्वापि निशाबलात् ॥ पारदारिकदस्यूनां । यामिनी जननी खलु ॥ २९ ॥ आः पापिष्टे प्रमुषिता । ताराचंद्रेण दस्युना ॥ त्वमीदृशस्य योग्यासि । धूर्तराजस्य सर्वदा ॥ ३० ॥ मया त्वं वार्यमाणापि । निर्धने पथिके रता ॥ वृद्धवाक्याविधाना त-त्फलमेतदुपस्थितं ॥ ३१ ॥ यतः—वृद्धवाक्यं सदा मान्यं । प्राज्ञैश्च गुणशालिभिः ॥ पश्य हंसान् वने बद्धान् । वृद्धवाक्येन मोचितान् ॥ ३२ ॥ यदेकः स्थविरो वेत्ति । न तत्तरुणकोटयः ॥ जीर्णमन्नं यथा पथ्यं । न तथा नवशालयः ॥३३॥ वचोभिरित्थं कुट्टिन्या । तर्जिता मौनमाश्रिता ॥ भीता मदनमंजूषा । रुदंती च स्थिता

द्राणं ॥ ३४ ॥ इतश्च ताराचंद्रोऽसौ । कुरुचंद्रेण धीमता ॥ सार्धमंबुधिमुल्लंघ्य । क्षेमेण स्वपुरं गतः ॥ ३५ ॥ पुरीसमागतं राजा । पृष्ट्वा वृत्तांतमादितः ॥ विस्मयापन्नचेतास्तं । प्रशशंस मुहुर्मुहुः ॥ ३६ ॥ भूपेनातिशुभे घस्रे । राज्ये संस्थापितः सुतः ॥ कुरुचंद्रस्तथा मंत्रि-पदे हर्षभरात्किल ॥ ३७ ॥ आदिवराहो नृपति-श्चारित्रं प्रतिपद्य च ॥ तपो विधाय विविधं । स्वर्गं भूषयतिस्म सः ॥ ३८ ॥ यतः—शैशवेऽभ्यस्तविद्यानां । यौवने विषयेषिणां ॥ वार्धके मुनिवृत्तीनां । नराणां सफलं जनुः ॥ ३९ ॥

न्यायेन राज्यं बिभ्राण-स्ताराचंद्रो महीपतिः ॥ उपयेमे नृपसुतां । शचीमिव शचीपतिः ॥ ४० ॥ अन्यदा वसुधाधीशः । संप्रेष्य निजपूरुषान् ॥ सांबां मदनमंजूषां । डागाकारयतिस्म सः ॥ ४१ ॥ प्रियामुखात्समाकर्ण्या-भरणोदंतमुच्चकैः ॥ चुकोपोपरि कुट्टिन्या । नृपतिर्भूरिमन्युमान् ॥ ४२ ॥ अवदच्चानया चौर-कलंकोऽदायि यन्मम ॥ तदस्या नाशिकाकर्ण-च्छेदनं क्रियतामिति ॥ ४३ ॥ तदा मदनमंजूषा । प्रणिपत्य महीप-

तिं ॥ प्रोचे नाथापराधोऽय–मेकोऽस्याः क्षम्यतामिति ॥ ४४ ॥ यतः—

स्थानं सर्वस्य दातव्य—मेकवारापराधिनः ॥ द्वितीयपतनाद्दंता । वक्त्रेणापि विवर्जिताः ॥ ४५ ॥ प्रियाया वचनान्मुक्ता । दयया चापि कुट्टिनी ॥ वसुधाया धवेनाशु । संतो हि नतवत्सलाः ॥ ४६ ॥ अन्येद्युरागतस्तत्र । गुरुर्गुरुगुणैर्युतः ॥ बहुश्रुतधरो धीमान् । पंचाचारपरः क्षमी ॥ ४७ ॥ राज्ञा स्वमंदिरासन्ना । वसतिस्तस्य शोभना ॥ प्रददे पुण्यपोषाय । शोषाय सकलैनसां ॥ ४८ ॥ साधुनापि महीभर्तुः । सपौरस्य ददे तदा ॥ धर्मोपदेशो वसति–दानप्रत्युपकृत्किमु ॥ ४९ ॥ अहन्यहनि बोधव्यं । किमद्य सुकृतं कृतं ॥ आयुषः खंममादाय । रविरस्तं प्रयात्यसौ ॥ ५० ॥ यस्य त्रिवर्गशून्यानि । दिनान्यायांति यांति च ॥ स लोहकारभस्त्रेव । श्वसन्नपि न जीवति ॥ ५१ ॥ गुरोरित्युपदेशं स्राग् । श्रुत्वा सर्वजनो मुदा ॥ प्रतिबुद्धो विनैकं हि । कुरुचंद्राख्यमंत्रिणं ॥ ॥ ५२ ॥ चिंतितं च तदा राज्ञा । शृण्वन् धर्मं मया समं ॥ न प्रबोधं गतो मंत्री । त-

न्न जातं हि शोभनं ॥ ५३ ॥ ततोऽस्यैव गृहे साधो-र्वसतिं दापयाम्यहं ॥ येन शृणो-
त्युपदेशं । क्रियां पश्यति नित्यशः ॥ ५४ ॥ रीत्यानयापि चेदस्य । प्रबोधः स्यात्तदा व-
रं ॥ विमृश्येति नृपः प्रोचे । मंत्रिन् मे श्रूयतां वचः ॥ ५५ ॥ व्यग्रत्वाद्राज्यकार्ये च ।
त्वं न शक्नोषि धीनिधे ॥ साधूनामंतिकं गंतुं । निष्पुण्यानां सुदुर्लभं ॥ ५६ ॥ ततो
जंगमतीर्थानां साधूनां साधुताजुषां ॥ स्वगृहे वसतिं देहि । धर्मं तेभ्यः शृणोषि यत् ॥
॥ ५७ ॥ धर्म एवार्हतः सारं । संसारे मोक्षकारणं ॥ अन्यत्सर्वं धनं ज्ञात्या-दिकं भव-
निबंधनं ॥ ५८ ॥ यतः—

विहमंति सुआ विहमंति बंधवा । विहडइ सुसंचिउ अच्छो ॥ इक्को नवरि न वि-
हम्मइ । जिणिंदवरदेसिउ धम्मो ॥ ५९ ॥ वित्तं च गेहे स्वजनाः श्मशाने । विश्राम-
भूमौ विरमंति नार्यः ॥ देहं चितायां परलोकमार्गे । कर्मानुगो गच्छति जंतुरेकः ॥६०॥
इति नृपालवचनं । प्रतिश्रुत्य स धीसखः ॥ कुरुचंद्रो निजे गेहे । साधूनां गुणशालि-

नां ॥ ६१ ॥ रामाभिः पशुभिश्चैव । षंढैश्च परिवर्जितां ॥ वसतिं प्रददौ शश्व—त्स्वाध्या-
यध्यानसाधनं ॥ ६२ ॥ युग्मं ॥ धर्मोपदेशश्रवणात् । क्रियाया दर्शनादपि ॥ तपोधने-
षु सचिवः । किंचिज्जज्ञे स सादरः ॥ ६३ ॥ परं प्रपेदे नो धर्मं । गुरुकर्मोदयेन सः
॥ यथा ज्वरज्वरे मर्त्यः । शर्कराघृतपायसं ॥ ६४ ॥ मासकल्पे समाप्ते ते । विजह्रुः सा-
धवोऽपि हि ॥ यदेतेषां हि नैकत्र । वसतिः प्रतिपादिता ॥ ६५ ॥ यतः—समणाणं स-
उणाणं । भमरकुलाणं च गोकुलाणं च ॥ अनिआउ वसहीउ । सारइआणं च मे-
हाणं ॥ ६६ ॥ इथी पीहर नर सासरे । चारित्रीउ घरवास ॥ एता होय अलखामणा
। जलंघे चउमास ॥ ६७ ॥

अर्हच्चैत्यप्रतिमानां । विधापनार्चनैः सदा ॥ पौषधानां च करणै—र्विधिना सर्वपर्वसु
॥ ६८ ॥ इत्थं भूमिपतिः कृत्वा । शासनोन्नतिमर्हतः ॥ धर्मध्यानपरो मृत्वा । क्रमात् स्व-
र्गं जगाम सः ॥ ६९ ॥ युग्मं ॥ कुरुचंद्रोऽथ सचिवो । धर्मश्रद्धाविवर्जितः ॥ विषयप्र-

सक्तस्तिर्य—ग्योनौ मृत्वोदपद्यत ॥ ७० ॥ ततोऽसावटवीमध्ये । पुलिंदोऽजनि कृष्णरुक्
तेनान्यदा शैलगर्भा—तरितेन धनुर्भृता ॥ ७१ ॥ साधवः सह सार्थेन । समायाता निरी-
क्षिताः ॥ इति स्वचित्ते संजाता । चिंता चक्रे च द्राग् तदा ॥ ७२ ॥ युग्मं ॥ ईदृशा
मुनयः क्वापि । पुरा जन्मनि वीक्षिताः ॥ इति चिंताजुषस्तस्य । जातिस्मृतिरजायत ॥
॥ ७३ ॥ कुरुचंद्रभवे धर्मः । श्रुतोऽपि न धृतो हृदि ॥ ततो हितार्थं वसुधा—धिपेन
मम मंदिरे ॥ ७४ ॥ वसतिर्दापिता साधु—पुंगवानां तपस्विनां ॥ तथापि मंदभाग्यस्य ।
नोपकारो ममाभवत् ॥ ७५ ॥ युग्मं ॥ अतो हताशः किमहं । करोमीति विमृश्य सः ॥
साधूनत्वार्हतं धर्मं । प्रपेदे भक्तिभृद्भृशं ॥ ७६ ॥ सर्वं दुःकृतमालोच्य । चतुःशरणमा-
श्रितः ॥ क्षमयित्वाखिलान् जंतून् । परं संवेगमुद्वहन् ॥ ७७ ॥ ततः प्रपद्यानशनं । स्म-
रन् पंचनमस्कृतिं ॥ आयुः प्रपूर्य सौधर्मे । सोऽभवत्सुरसत्तमः ॥ ७८ ॥ युग्मं ॥ इत्थं फ-
लं वसतिदानतरोर्निशम्या—प्यन्योपरोधजनितस्य महोदयस्य ॥ मंत्रींद्रवर्यकुरुचंद्रकथान-

कोक्तं । भव्या मुनेर्वसतिदानविधौ यतध्वं ॥ ७० ॥ इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकनककुशलगणिविरचिते दानप्रकाशे वसतिदानप्रकाशकः प्रथमः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ द्वितीयः प्रकाशः प्रारभ्यते ॥

अथ पद्माकराख्येन । साधूनां समताभृतां ॥ शय्यादानं यथा दत्तं । तथा देयं मनीषिभिः ॥ १ ॥ तद्यथा—जंबूद्वीपविदेहस्थे । पुरे पुष्पपुराभिधे ॥ शेखराख्यो महीपालो । बभूव कुलशेखरः ॥ २ ॥ स्ववंशतिलकस्तत्र । श्रेष्ठी तिलक इत्यभूत ॥ रतिसुंदरीति नाम्ना । प्रियाभूद्रतिसुंदरी ॥ ३ ॥ तयोर्बभूव तनयः । पद्मस्वप्नोपसूचितः ॥ पद्माकर इति ख्यातो । नाम्ना धाम्ना रवेः समः ॥ ४ ॥ चातुर्यौदार्यतारुण्य—प्रज्ञालज्जादयो गुणाः ॥ सपुण्यमेयुस्तं विप्रा । दानिनं धनिनं यथा ॥ ५ ॥ सुरूपाः कुलजाः कन्या । लावण्यरसदीर्घिकाः ॥ पित्रा हि युगपत्तस्य । चतस्रः परिणायिताः ॥ ६ ॥ अथ क-

मेण तिलको । धर्मं कृत्वा गतो दिवं ॥ पद्माकरो गृहस्वामी । जज्ञे जनमनःप्रियः ॥
॥ ७ ॥ अन्यदा कनकस्तंभं । लसत्स्फटिकभित्तिकं ॥ धनधान्यसमाकीर्णं । प्रासादं स-
प्तभूमिकं ॥ ८ ॥ मुक्ताकलापकलितं । चारुचंद्रोदयान्वितं ॥ सुखप्रदशुभस्पर्शो—त्तमप-
ल्यंकशोभितं ॥ ९ ॥ परितो वेष्टितं प्रासा—दैश्चतुर्भिर्मनोहरैः ॥ सर्वार्थाख्यं विमानं किं
। सहसाथ ददर्श सः ॥ १० ॥ त्रिभिर्विशेषकं ॥

तावदाविरभूद्वाणी । व्योम्नीति श्रुतिशर्मदा ॥ पद्माकर पित्रा तव । देवीभूतेन नि-
र्मितः ॥ ११ ॥ प्रासादः सुंदराकार—स्तवावस्थानहेतवे ॥ तदत्र स्वेछया तिष्ट । भोगान्
भुंक्ष्व यथेप्सितान् ॥ १३ ॥ युग्मं ॥ राज्ञो निवेद्योदंतं तं । तदाज्ञां समवाप्य सः ॥ च-
तसृणां स्वकांतानां । प्रासादं प्रददे पृथक् ॥ १४ ॥ स्वयं तु मुख्ये भवने । तस्थौ क्री-
डापरायणः ॥ गमयन् सर्वदा कालं । निश्चिंतः सुरराडिव ॥ १५ ॥ पद्माकरस्य यत्किं-
चि—द्वस्तु तत्र विलोक्यते ॥ पूर्यते तत्सुरेणाशु । पुण्यैः किं नाम दुर्लभं ॥ १६ ॥ य-

तः—पुण्यैः संभाव्यते पुंसा—मसंभाव्यमपि क्षितौ ॥ तेरुर्मेरुसमाः शैलाः । किं न रा-
मस्य वारिधौ ॥ १७ ॥ ताराभिरिव शीतांशुः । करिणीभिरिव द्विपः ॥ यथाप्सरोभिर्दे-
वेंद्रः । स्त्रीभिश्चिक्रीड सोऽन्वहं ॥ १८ ॥ ग्रामांतरगतस्यापि । शय्या संपद्यतेऽस्य यत् ॥
महाप्रसिद्धिः संजाता । पृथ्व्यां पद्माकरस्य तत् ॥ १९ ॥ यतः—वार्ता च कौतुकवती
विशदा च विद्या । लोकोत्तरः परिमलश्च कुरंगनाभेः ॥ तैलस्य बिंदुरिव वारिणि दुर्नि-
वार—मेतत्त्रयं प्रसरतीति किमत्र चित्रं ॥ २० ॥ धन्यः पद्माकरो लोके । यस्य देवोऽ-
पि नित्यशः ॥ मनोऽभीष्टतरान् भोगान् । पूरयत्यद्भुतानिति ॥ २१ ॥

चत्वारस्तनयास्तस्य । सुरूपा जज्ञिरे क्रमात् ॥ अंशाः प्राचीनपुण्यस्य । मूर्तिमंत
इवाभवन् ॥ २२ ॥ अन्येद्युर्गुरवस्तत्रा—याता अमरसूरयः ॥ ज्ञानत्रयधरा धीराः । साधु-
संघसमन्विताः ॥ २३ ॥ तेषामागमनं श्रुत्वा । जातरोमांचकंचुकः ॥ सपौरः पृथिवीपालः
। श्रेष्ठी पद्माकरस्तथा ॥२४॥ आगम्य नत्वा विधिव—द्गुरूणां पदपंकजं ॥ उपाविशन् पु-

रो धर्म-देशनां श्रोतुमादरात् ॥२५॥ युग्मं ॥ गुरुणाथ समारब्धा । चारुपीयूषसन्निभा ॥ देशना भव्यसंघात-प्रतिबोधविधायिनी ॥ २६ ॥ प्रतिपच्चंद्रं सुरभि—र्नकुलो नकुलीं पयश्च कलहंसः ॥ चित्रकवल्लीं पक्षी । सूक्ष्मं धर्मं सुधीर्वेत्ति ॥ २७ ॥ विलंबो नैव कर्तव्य । आयुर्याति दिने दिने ॥ यमस्य करुणा नास्ति । धर्मस्य त्वरिता गतिः ॥ २८ ॥

इत्यादिदेशनां श्रुत्वा । गुरुं पप्रच्छ नृपतिः ॥ प्रभो पद्माकरस्येदृग्-विधा ऋद्धिरभूत्कथं ॥ २९ ॥ गुरुरूचे पुरा भोग-पुरेऽभून्नंदनाभिधः ॥ श्रेष्ठी धनाढ्यः सदयः । प्रकृत्या भद्रकः सदा ॥ ३० ॥ अन्यदाषाढमासस्य । वलक्षदशमीदिने ॥ चतुर्मासीमवस्थातुं । तत्राजग्मुर्गुरूत्तमाः ॥ ३१ ॥ गुरुणा युगलं साध्वोः । प्रेषितं नंदनगृहे ॥ नंदनेन च तद् दृष्ट्वा । नत्वा च जगदे मुदा ॥ ३२ ॥ किमर्थमत्रागमनं । भवतां भवभीजुषां ॥ विलोक्यते च यद्वस्तु । प्रोच्यतां त्वरितं हि तत् ॥ ३३ ॥ ताभ्यामभाणि भोः श्रेष्ठिन् । शय्या शयनहेतवे ॥ विलोक्यते ततो वेश्म-न्यावाभ्यामागतं तव ॥ ३४ ॥

प्रधानकाष्टनिष्पन्ना । पट्टिका पृथुला वरा ।। सुश्लिष्टसंधिः साधुभ्यां । दर्शिता तेन सत्वरं ।।३५।। प्रोचे च गृह्यतामेषा । सर्वदैवात्र सुप्यतां ।। सदास्तु भवदायत्ता । युष्माकं मयकार्पिता ।। ३६ ।। साधुभ्यां गदितं भद्र । वर्षाकाले हि साधवः ।। शेरते काष्टशय्यायामन्यदा ते महीतले ।। ३७ ।। यतः—भूः पर्यंकं निजभुजलता गल्लकं खं वितानं । दीपश्चंद्रो विरतिवनिता रेणुना चांगरागः ।। दिक्कन्याभिः पवनचमरैर्वीज्यमानोऽनुकूलं । भिक्षुः शेते नृप इव सदा त्यक्तसर्वाभिलाषः ।। ३८ ।। वर्षाकाले यतः पृथ्वी । त्रसजीवसमाकुला ।। अतो भूशयनानुज्ञा । साधूनां न ददे जिनैः ।। ३९ ।। एवमस्त्विति तेनोक्ते । पट्टिकां प्रातिहारिकं ।। कंबलादिकमादाय । जग्मतुस्तावुपाश्रये ।। ४० ।। इयं हि गुरुयोग्येति । पट्टिका स्थानके शुभे ।। स्थापिता साधुभिस्तस्यां । कंबलैः संस्तरः कृतः ।। ४१ ।। स्वाध्यायाध्ययनव्याख्या—ध्यापनोत्थश्रमाकुलाः ।। गुरवः शेरते तस्यां । लभंते च सुखं ततः ।। ४२ ।। शयितान् वीक्ष्य स गुरु—र्नंदनोऽप्यन्वमोदत ।। सोऽहं

धन्योऽस्मि यद्भव्या । गुरूणामुचिताऽभवत् ॥ ४३ ॥

अथ च व्यतीते वर्षा–समये पट्टिकादिकं ॥ प्रत्यर्प्य जग्मुरन्यत्र । गुरवो गुणसागराः ॥ ४४ ॥ नंदनोऽपि क्रमेणायुः । प्रपूर्याभूत्सुरो दिवि ॥ ततश्च्युत्वायमभवत् । श्रेष्ठी पद्माकराभिधः ॥ ४५ ॥ तत्पुण्यप्रेरितस्तातो । देवीभूतोऽप्यहर्निशं ॥ पूरयति स्नेहात्तस्य । सर्वं शय्यादिकं ध्रुवं ॥ ४६ ॥ इत्थं गुरुवचः श्रुत्वा । जातिस्मृतिरभूत्तदा ॥ पद्माकरस्य निःशेष—पूर्वोदंतप्रकाशिका ॥ ४७ ॥ सुश्राद्धधर्मं विधिव–त्प्रपद्य प्रणिपत्य च ॥ गुरून् सर्वे निजं धाम । जग्मुः पद्माकरादयः ॥ ४८ ॥ प्रत्यहं जिनपूजायां । गुरुभक्तौ च सादरः ॥ दाने दयायां निरतो । विरतः पापकर्मणः ॥ ४९ ॥ पद्माकरः क्रमात श्राद्ध–धर्ममाराध्य सादरं ॥ अंते चानशनं कृत्वा । मृत्वाभूत्त्रिदशोत्तमः ॥ ५० ॥ अंतर्भवाष्टकं मोक्षो । भविष्यति सुखास्पदं ॥ पद्माकरस्य शय्याया । दानमाहात्म्यतो ध्रुवं ॥ ५१ ॥ पद्माकराख्यानमिदं निशम्य । मुमुक्षुशय्याप्रतिपादनोत्थं ॥ भव्यैः प्रदेया

व्रतिनां सुखार्थं । शय्याः प्रव्रज्याप्रतिपालनार्थं ॥ ५१ ॥ इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकनककुशलगणिविरचिते दानप्रकाशे शय्यादानप्रकाशको द्वितीयः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ तृतीयः प्रकाशः प्रारभ्यते ॥

अथास्तिकेन साधूना–मासनं धर्मसाधनं ॥ करिराजनृपस्येव । दातव्यं तत्कथा यथा ॥ १ ॥ जंबूद्वीपस्य भरत–क्षेत्रे शस्यर्द्धिबंधुरे ॥ आसीन्मंगलकलितं । श्रीमंगलपुरं पुरं ॥ २ ॥ प्रजायाः पालने दक्षः । पृथ्वीपालाभिधो नृपः ॥ तत्राभवद्भूरिगुणा–लंकारकरुणार्णवः ॥ ३ ॥ तत्र लक्ष्मीधरः श्रेष्टी । राजमान्यः प्रसिद्धिभाक् ॥ दीनोद्धारकरो धीमान् । भाग्यसौभाग्यबंधुरः ॥ ४ ॥ श्रीधर्मघोषसुरींद्रो । बहुशिष्यसमन्वितः ॥ ज्ञानत्रयधरो धीरो–ऽन्येद्युस्तत्रायर्यौ गुरुः ॥ ५ ॥ गुरोरागमनोदंतं । निशम्य धरणीधवः ॥ लक्ष्मीधरादिपौरौघ–सहितो नंतुमागमत् ॥ ६ ॥ गुरुं प्रणम्य विधिवद् । भूपत्यादिजन-

व्रजे ॥ उपविष्टे क्षमाशाली । स ददौ धर्मदेशनां ॥ ७ ॥ यथा—बुद्धेः फलं तत्वविचारणं च । देहस्य सारं व्रतधारणं च ॥ अर्थस्य सारं किल पात्रदानं । वाचः फलं प्रीतिकरं नराणां ॥ ८ ॥ दानं वित्ताहृतं वाचः । कीर्तिधर्मौ तथायुषः ॥ परोपकरणं काया—दसारात्सारमुद्धरेत् ॥ ९ ॥ इत्यादिदेशनां श्रुत्वा । श्रेष्ठी लक्ष्मीधरोऽवदत् ॥ ईदृशा गुणिनः पट्टे । किं नोपविशतान्वहं ॥ १० ॥ गुरुः प्रोवाच भो श्रेष्ठि—न्नृतुबद्धे ह्यनेहसि ॥ निषिद्धः काष्टपट्टादि—संग्रहो व्रतिनां जिनैः ॥ ११ ॥ वर्षाकाले तु जंतूनां । बाहुल्यादनगारिणां ॥ अर्हद्भिरप्यनुज्ञातः । काष्टपट्टादिसंग्रहः ॥ १२ ॥

गुरोरिति वचः श्रुत्वा । ततो लक्ष्मीधरोऽब्रवीत् ॥ साधूनां कल्पते नित्यं । यस्मिन् काले सदासनं ॥ १३ ॥ तस्मिन् काले मया देयं । साधूनां तत्तदासनं ॥ अभिग्रहोऽयं भगवन् । ममास्तु बहुपापहृत् ॥ १४ ॥ युग्मं ॥ इत्युदीर्य गुरुं नत्वा । ययुः सर्वे स्वमंदिरं ॥ लक्ष्मीधरः सपौरश्च । पृथ्वीपालो नरेश्वरः ॥ १५ ॥ सूरयोऽन्यत्र विहृत्य । प्र-

तिबोध्य जनव्रजं ॥ चतुर्मासीमवस्थातुं । तत्रायाताः ससाधवः ॥ १६ ॥ तदैकः पृथुलः पट्ट–श्चारुदारुविनिर्मितः ॥ विचित्रचित्रसहितो । मत्कुणादिविवर्जितः ॥ १७ ॥ लक्ष्मीधरेण सूरीणां । प्रददे भक्तिशालिना ॥ श्रद्धावुः सुगुरोर्योग्यं । किं नार्पयति वस्तु यत् ॥ १८ ॥ युग्मं ॥ पट्टोपविष्टं सुगुरुं । वीक्ष्य लक्ष्मीधरो मुदा ॥ दध्याविति जने धन्यो–ऽस्म्यहं मान्योऽस्मि सर्वदा ॥ १९ ॥ धर्मोपदेशं ददते । यस्य मे पट्टमाश्रिताः ॥ प्रकुर्वते च स्वाध्यायं । गुरवो गतकल्मषाः ॥ २० ॥

समुपार्ज्य घनं पुण्यं । पट्टदानानुमोदनात् ॥ लक्ष्मीधरः प्रपूर्यायुः । पंचत्वं प्राप स क्रमात ॥ २१ ॥ इतश्च कांचनपुरे । हस्तिनामाभवन्नृपः ॥ कमलाख्या प्रिया तस्य । कमलेवानुरूपभृत् ॥ २२ ॥ लक्ष्मीधरस्य जीवोऽथ । तस्याः कुक्षाववातरत् ॥ हस्तिराजमहास्वप्न–सूचितः शुभवासरे ॥ २३ ॥ समयेऽसूत सा देवी । देवसन्निभमंगजं ॥ अहर्पतिमिव प्राची । प्रोल्लसन्महसां निधिं ॥ २४ ॥ तस्य स्वप्नानुसारेण । महामहपुरस्सरं ॥

करिराज इति ख्यातं । पित्रा नाम विनिर्ममे ॥ २५ ॥ क्रमेण वर्द्धमानोऽथ । शिक्षिता-
सेषसत्कलः ॥ आससाद स तारुण्यं । योषिज्जनमनोहरं ॥२६॥ समानरूपलावण्य-ज्ञा-
नविज्ञानभूषिताः ॥ पितुर्निदेशतस्तेन । परिणिन्ये नृपात्मजाः ॥ २७ ॥ करिराजमथो
॥ ३० ॥ पुत्रं । राज्ये संस्थाप्य नृपतिः ॥ स्वयं दीक्षामुपादाय । जगाम त्रिदशालयं ॥ २८ ॥ क-
रिराजोऽपि भूपालो । वैरिकक्षदवानलः ॥ न्यायेन पालयामास । राज्यं प्रौढप्रतापवान्
॥ २९ ॥ अथ तत्रैव नगरे । रथकृत्समराभिधः ॥ सिद्धविज्ञानधनो धीमान् । वसतिस्म
जनप्रियः ॥ ३० ॥ यतः—वणिआणं वणिज्जंमि । माहणाणं खु मुहम्मि अ ॥ खत्ति-
आणं सिरी खग्गे । कारुणं सिप्पकम्ममु ॥ ३१ ॥ विदेशादन्यदा कश्चि-च्छिल्पज्ञो र-
थकारकः ॥ तस्य गेहे शुभाकारः । समागात्सोमिलाभिधः ॥ ३२ ॥

समरः सोमिलं प्रोचे । भद्र त्वं कुत आगतः ॥ विदेशादिति सोऽप्यूचे । देश-
दर्शनकौतुकी ॥ ३३ ॥ समीक्ष्य सुंदराकारं । समरोऽपि तमादरात् ॥ धारलाख्यां सुतां

दान-
प्रकाशः
॥ ३१ ॥

तस्मै । सुरूपां प्रददौ जवात ॥ ३४ ॥ यतः—धर्मारंभे ऋणछेदे । कन्यादाने धनागमे ॥ शत्रुघाताग्निरोगेषु । कालक्षेपो न युज्यते ॥ ३५ ॥ रममाणस्तया सार्धं । सोमिलः सोऽत्यवाहयत ॥ दिनानि निवसन् गेहे । विभिन्ने श्वशुरार्पिते ॥ ३६ ॥ सोमिलस्वजनाः सर्वे । शकटादिकृतीछया ॥ वने गृहीतुं दारूणि । प्रयांति प्रतिवासरं ॥ ३७ ॥ ततस्ते दारुसंघात-मानीय निजमंदिरे ॥ शकटाद्यं घटयंति । विक्रयाय सदोद्यताः ॥ ३८ ॥ सोमिलोऽपि वने याति । तैः सार्धमनुवासरं ॥ परं किमपि नादत्ते । काष्टं घटनहेतवे ॥ ३९ ॥ ततः स स्वजनैः प्रोचे । काष्टं गृह्णासि किं न हि ॥ सोऽवोचद् ग्रहणस्यैव । योग्यं पश्यामि तन्न हि ॥ ४० ॥

श्रुत्वेति वचनं तस्यो-चुः शाला हासपूर्वकं ॥ सदृष्टिरप्ययमहो । वने काष्टं न पश्यति ॥ ४१ ॥ ग्रथिलः सोमिलोऽस्तीति । तैरुक्तेऽपि मनागसौ ॥ न चुकोप यतो विद्वान् । समयं वीक्षते सदा ॥ ४२ ॥ यतः—वाजिवारणलोहानां । काष्टपाषाणवाससां ॥

नारीपुरुषतोयाना-मंतरं महदंतरं ॥ ४३ ॥ एकदा वनमध्येऽसौ । गतो काष्टं सलक्षणं ॥
दृष्ट्वा गृहे तदानीया-घटयद्दारुहस्तकं ॥ ४४ ॥ ततोऽसौ तं स्वकांताया । अर्पयित्वा क-
रेऽब्रवीत ॥ अमुं गृहीत्वा गछ त्वं । राजमार्गे ममाज्ञया ॥ ४६ ॥ लोकानां दर्शयेद्दारु-
हस्तकं गृह्यतामसौ ॥ इति वाच्यं यदा मूल्य-मस्य पृछंति ते प्रिये ॥ ४७ ॥ तदा त्व-
यास्य वक्तव्यं । द्रम्मलक्षमवक्रयं ॥ तन्मूल्यमर्पयेद्यस्तु । तस्यायं दीयतां द्रुतं ॥ ४८ ॥
आनेतव्योऽन्यथा गेहे । त्वयासौ दारुहस्तकः ॥ इति चेत्कोऽपि पृछेत्त्वां । मूल्यमेतत्कि-
मस्य हि ॥ ४९ ॥ इत्युत्तरं त्वया तस्य । दातव्यं सुभ्रु सत्वरं ॥ गुणानां मयका मूल्यं
प्रोच्यते न तु दारुणः ॥ ५० ॥ यतः—गुणैरेव महत्त्वं स्या-न्न तु सद्ज्ञातिमंबरैः ॥
वानेयं गृह्यते पुष्प-मंगजस्त्यज्यते मलः ॥ ५१ ॥

गुणास्त्वाकर्णयंतां प्रोच्य-मानोऽस्य मयका ध्रुवं ॥ पूजितोऽयं ददात्युच्चै-र्वांछितं व-
स्तु नित्यशः ॥ ५२ ॥ पत्युः शिक्षां गृहीत्वेति । सा जगाम चतुष्पथं ॥ लोके पृछति

मूल्यं द्राक् । तस्य लक्षेति चावदत् ॥ ५३ ॥ ततस्तां सस्मितं स्माह । लोकः प्राकृतभा-
षया ॥ लाखार्थिनी तदा गच्छ । त्वरितं पिप्पलादिषु ॥ ५४ ॥ अथ तत्र समेतेन । स-
चिवेनापि सा वशा ॥ पृष्टा मूल्यं गुणं चोचे । पूर्ववत्प्रियवाक्यतः ॥ ५५ ॥ तद्वाक्यं
सचिवः श्रुत्वा । विममर्शेति चेतसि ॥ बहुरत्ना हि विद्वद्भि–र्वसुधा परिकीर्तिता ॥ ५६ ॥
यतः—पदे पदे निधानानि । योजने रसकूपिका ॥ भाग्यहीना न पश्यंति । बहुरत्ना
वसुंधरा ॥ ५७ ॥ विमृश्येत्यवदन्मंत्री । शृणु भद्रे ममोदितं ॥ अर्पयिष्याम्यस्य मूल्यं ।
परीक्ष्यागामिवासरे ॥ ५८ ॥ एवमस्त्विति सा प्रोच्य । समेतासौ च मंदिरे ॥ पत्युः
स्वरूपं सकलं । कथयामास कामिनी ॥ ५९ ॥ अथ मंत्री गृहे गत्वा । पट्टे संस्थाप्य
भक्तितः ॥ दारुहस्तं पूजयित्वा । याचयामास वांछितं ॥ ६० ॥ स क्षणात्पूरयामास ।
तच्चिंतारत्नवत्तदा ॥ तादृशं हि शुभं वस्तु । जातु निर्दैवतं न हि ॥ ६१ ॥ स दृष्टप्रत्य-
यो मंत्री । रुक्माणां लक्षमादरात ॥ प्रभाते प्रेषयामास । रथकृत्सोमिलौकसि ॥ ६२ ॥

धीसखेन ततः सर्वं । वृत्तांतं मेदिनीपतेः ॥ निवेद्य दारुहस्तस्य । भांडागारं प्रपूरितं ॥ ॥ ६३ ॥ विस्मितो नृपतिः प्रोचे । मंत्रिन्मे दर्शयापरं ॥ विज्ञानं रथकारस्य । चमत्कारकरं नृणां ६४ ॥ दृष्टं काष्टदलं रम्यं । सोमिलेनान्यदा पुनः ॥ घटितस्तस्य पर्यंकः । प्रियायाश्च समर्पितः ॥ ६५ ॥ प्रोक्तं च तेन हे भद्रे । त्वं पर्यंकं मयार्पितं ॥ द्रम्माणां दशभिर्लक्षै–र्विक्रीणीयाश्चतुष्पथे ॥ ६६ ॥

तथास्य गुणपृछायां । प्रिये वाच्यं त्वया नृणां ॥ रजन्यां वीक्ष्य माहात्म्यं । मूल्यं दातव्यमाशु मे ॥ ६७ ॥ भर्तुः शिक्षां प्रपद्येवं । सा जगाम चतुष्पथं ॥ दर्शयामास लोकानां । मंचकं च मनस्विनी ॥ ६८ ॥ तत्स्वरूपपरिज्ञान–विकलैः सकलैरपि ॥ पूर्ववद्गदितं लोकै––र्वचोऽभेदभियेव किं ॥ ६९ ॥ यतः––जो जाणइ जस्स गुणे । लोए सो तस्स आयरं कुणइ ॥ फलिए दख्कारामे । काउ लिंबोहलिं चुणइ ॥ ७० ॥ स एव धीसखस्तत्र । समागाद्दिवसात्यये ॥ मंचं दृष्ट्वेति तां चोचे । मूल्यमस्य निवेदय ॥ ७१ ॥

ततः ॥ सावोचदेतस्य । मूल्यं शृणु विदांवर ॥ द्रम्माणां दशलक्षाणि । सुलक्षणशिरो-
मणे ॥ ७२ ॥ ब्रूहि भद्रे गुणानस्ये-त्युक्ता सा मंत्रिणावदत् ॥ सुप्त्वा नक्तं गुणान् वी-
क्ष्य । मूल्यं दातव्यमस्य मे ॥ ७३ ॥ अथो न रोचते चेद्वः । पर्यंकोऽयं तदा मम ॥
प्रत्यर्पणीयः सर्वो हि । वस्तु गृह्णाति सुंदरं ॥ ७४ ॥ तद्वचः प्रतिश्रुत्येति । तमादाय नृ-
पाय सः ॥ सचिवः प्रददावुक्त्वा । वृत्तांतं तदुदीरितं ॥ ७५ ॥ अथ राजा समभ्यर्च्य ।
पर्यंकं विधिपूर्वकं ॥ सुष्वाप निद्रारहित-स्तत्र माहात्म्यमीक्षितुं ॥ ७६ ॥ ततो मंचपदै-
र्यदा-धिष्ठितैरुक्तमित्यरं ॥ किमत्र स्थीयतेऽस्माभिः । कौतुकेक्षणवंचितैः ॥ ७७ ॥ यतः
—गीतशास्त्रविनोदेन । कालो गच्छति धीमतां ॥ व्यसनेन तु मूर्खाणां । निद्रया क-
लहेन वा ॥ ७८ ॥ इत्यालोच्य मिथो मंच-पादा उत्पत्य पुष्करे ॥ क्षणेन वैताढ्यगि-
रौ । प्रजग्मुस्ते समंचकाः ॥ ७९ ॥ दिव्यरूपाः सुरा मुक्त्वा । प्रदेशे क्वापि मंचकं ॥ स्व-
यं देवगृहस्यांतः । समेता दर्शनोत्सुकाः ॥ ८० ॥ उत्थाय पृष्ठतस्तेषां । रहोवृत्त्या नृपो-

ऽपि सः ॥ समाजगाम तत्रैव । विस्मयोत्फुल्ललोचनः ॥ ८१ ॥ तत्र प्रेक्षणकं देवै-र्नि-
र्मितं वीक्ष्य विस्मिताः ॥ ते यक्षाः क्षितिपालश्च । मेनिरे जनुषः फलं ॥ ८२ ॥ यक्षाः
प्रोचुरथो लोको । जागरिष्यति तद्वयं ॥ गव्रामः स्थानकं स्वीय-मासन्नं वर्तते ह्युषः ॥
॥८४॥ इति यक्षवचः श्रुत्वा । गत्वा भूरमणो जवात् ॥ सुष्वाप मंचके चारु-पटीं प्रावृ-
त्य पूर्ववत् ॥ ८५ ॥ पर्यंकपादास्ते यक्षा । अधिष्ठायाशु मंचकं ॥ उत्पाट्य नजसा रा-
ज्ञो । मोचयंतिस्म वेश्मनि ॥ ८६ ॥ विज्ञाते मंचवृत्तातं । निवेद्य निजमंत्रिणः ॥ अ-
तीवहृष्टो नृपतिः । प्राशंसद्रथकृद्गुणान् ॥ ८७ ॥ यतः—गणं गुणेहिं जुज्जइ । ता गु-
णगहणं अवस्स कायव्वं ॥ हारो अ नेव पावइ । गुणरहिओ पीणथणवट्टं ॥ ८८ ॥ व-
स्त्राभरणसंयुक्तं । मूल्यं तस्य यथेप्सितं ॥ दापयामास नृपति-र्गुणैर्नार्चां लभेत कः
॥ ८९ ॥ नित्यं नक्तं महीपाल-स्तत्पर्यंकप्रभावतः ॥ कौतुकानि नवीनानि । पश्यति-
स्मोत्कमानसः ॥ ९० ॥ अन्यदा शिल्पिनं नृप-स्तं सन्मान्यांबरादिभिः ॥ प्रोचे मंचेन

गमनं । विरूपं दृश्यते जनैः ॥ ८१ ॥ ततो मे योग्यमाकाश–गामिनं कुरु हस्तिनं ॥ येन मे महती शोभा । देवेंद्रस्येव जायते ॥ ८२ ॥ शिल्पी प्राह महीशक्र । तद्योग्यं दारु नास्ति सत् ॥ राजावक्क्वापि वीक्षस्व । काननादिषु सोद्यमः ॥ ८३ ॥ इत्युक्त्वा नृपतिस्तस्य । शिल्पिनः प्रचुरं धनं ॥ शकटानि भृत्यलोकां–श्चार्पयामास भूरिशः ॥ ८४ ॥ प्रपद्यैतन्नृपवचः । शिल्पी बभ्राम कानने ॥ अपश्यच्च महावृक्ष–मुद्यमात्किं न सिध्यति ॥ ८५ ॥ यतः—उद्यमः खलु कर्तव्यो । मार्जारस्य निदर्शनात् ॥ जन्मप्रभृति गौर्नास्ति । दुग्धं पिबति नित्यशः ॥ ८६ ॥ उद्यमेन हि सिध्यंति । कार्याणि न मनोरथैः ॥ न हि सुप्तस्य सिंहस्य । प्रविशंति मुखे गजाः ॥ ८७ ॥ विज्ञाय कार्ययोग्यं तं । देवताधिष्ठितं तरुं ॥ धूपोत्क्षेपं बलिक्षेपं । तस्य चक्रे स शिल्पिराट् ॥ ८८ ॥

ततश्चिच्छेद तं वृक्षं । स शुभे दिवसे शुचिः ॥ बिभरांबभूव हर्षात । काष्टखंडैरनांसि च ॥ ८९ ॥ आनीय स्वगृहे काष्ट–दलानि विमलानि सः ॥ घटयामास करिणं ।

राज्ञो हर्षकरं स्यात् ॥ १०० ॥ उपायनीकृतो राज्ञः । शिल्पिना करिपुंगवः ॥ मनोरथा-
तिगं द्रव्यं । राज्ञाप्यस्यार्पितं तदा ॥ १ ॥ ततस्तं गजमारूढो । भूधवो वासवो यथा ॥
ऐरावणं नभोमार्गे । बभ्राम प्रतिवासरं ॥ २ ॥ वीक्ष्यमाणो नगडुंग-ग्रामाकरसमाकुलां
॥ वसुधामखिलां नाना-महाश्चर्यपदैर्भृतां ॥ ३ ॥ युग्मं ॥ गजप्रभावान्नृपते-र्भूधवा वै-
रिणोऽपि हि ॥ तस्याज्ञां सुमनोमालां । दधुः शिरसि सादराः ॥ ५ ॥ ब्रह्मांडभांडम-
खिलं । तेनापूरि महीभृता ॥ स्वयशोघनसारेण-तिगौरेण समंततः ॥६॥ अन्यदा सू-
रिसिंहानां । विज्ञायागमनं नृपः ॥ गत्वा च विधिवन्नत्वा । देशनामशृणोदसौ ॥ ७ ॥
देशनांते नृपोऽपृछ-दुरुं पूर्वभवे मया ॥ किं कृतं सुकृतं येने-दृशो लब्धो मतंगजः
॥ ८ ॥ नृपेण साधुरित्युक्त । उक्त्वा वृत्तांतमादितः ॥ पूर्वोदितं ततोऽवोच-चारुज्ञानांभ
सां निधिः ॥ ९ ॥ पूर्वे भवे त्वया राजन् । साधूनामासनं वरं ॥ यद्दत्तं तेन पुण्येन ।
लब्धोऽयं गजपुंगवः ॥ १० ॥ गुरुवाक्यमिति श्रुत्वा । जातिस्मृत्या निजं भवं ॥ दृष्ट्वा

नृपोऽवक् तत्सत्यं । यत्त्वयोदीरितं वचः ॥ ११ ॥ सम्यक्त्वमूलं सुश्राद्ध–धर्मं स प्रतिपन्नवान् ॥ गतवांश्च गुरून्नत्वा । स्वावासभुवनं विभुः ॥ १२ ॥ करिराजमहीपालः । कृत्वार्हच्छासनोन्नतिं ॥ आराध्य विधिवद्धर्मं । जगाम त्रिदशालयं ॥ १३ ॥ स्तोकैरेव महीभर्ता भवैरुत्तमतां गतैः ॥ अयं सुधर्मा निःकर्मा । क्रमान्मोक्षं गमिष्यति ॥ १४ ॥ इत्थं निशम्यासनचारुदान–निवेदनं श्रीकरिराजवृत्तं ॥ भव्यैः प्रदेयं मुनिपुंगवानां । सदासनं पापविनाशनं द्राक् ॥ १५ ॥ इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकनककुशलगणिविरचिते दानप्रकाशे आसनदाने करिराजकथारूपस्तृतीयः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ चतुर्थः प्रकाशः प्रारभ्यते ॥

अथ मोक्षाध्वनीनानां । साधूनां गुणशालिनां ॥ शुद्धान्नदानं दातव्यं । दीक्षापालनहेतवे ॥ १ ॥ यतः—आहारविरहिआणं । सिज्झासणमाइएहिं वत्थुहिं ॥ होइ ना-

साहारो । तो मुणीण देज्जं हि तद्दाणं ॥ २ ॥ तदन्नदानं कनक-रथस्येव मनीषिभिः
॥ भव्यैः प्रदेयं मोक्षाय । तत्कथाथ प्रतन्यते ॥ ३ ॥ जंबूद्वीपस्य भरत—मध्यगे पर्वते-
ऽभवत ॥ वैताढ्ये कनकपुरं । पुरं पुरगुणान्वितं ॥ ४ ॥ तत्र विद्याधराधीशो । रूपनि-
र्जितमन्मथः ॥ बभूव कनकरथा—भिधानो धरणीधवः ॥ ५ ॥ विद्यासिद्धः स गुणवा-
न् । कदाचिद्वीरचर्यया ॥ भ्रमन् पुरांतर्गतवान् । नक्तं देवकुले क्वचित् ॥ ६ ॥ असौ
लसत्प्रेक्षणके । जायमाने मनोहरे ॥ गायनैर्गातुमारब्धा-मिमां गाथां तदाशृणोत ॥
॥ ७ ॥ हंसा सव्वड सिञ्झा । सिहिणो सव्वड चित्तिअंगरुहा ॥ सव्वड जम्ममरणे । स-
व्वडवि भोइणं भोगा ॥ ८ ॥ श्रुत्वा गाथामिमां भूप-श्चिंतयामासिवानिति ॥ त्रयाणा-
मस्ति पादाना-मर्थोऽत्यर्थं हि युक्तिवान् ॥ ९ ॥ परं चतुर्थपादस्य । नार्थो मे प्रतिभा-
सते ॥ युक्तश्चेतसि यल्लोके । भोगिनोऽपि विदेशगाः ॥ १० ॥ सामग्रीविकलाः सम्यग्
। स्युः कथं भोगसंयुताः ॥ तत गत्वा विदेशेऽहं । परीक्षे पदमेतकं ॥ ११ ॥

विचिंत्येति नृपः प्रातः । स्वाकूतं विनिवेद्य तत ॥ मंत्रिणं कथयामास । चक्षुर्मंत्री हि भूपतेः ॥ १२ ॥ यदद्य ताम्रचूडाख्ये । योजनानां शतांतरे ॥ यास्याम्यहमितः पाद-परीक्षायै महामते ॥ १३ ॥ त्वयापि तत्रागंतव्यं । द्विप्रहर्या अनंतरं ॥ इत्युक्त्वोत्पत्य तत्रैव । जगाम वसुधाधिपः ॥ १४ ॥ अचिंतयच्च लोके हि । महत्त्वं लभते पुमान् ॥ रूपवान् भूषणैः सारै-र्वस्त्रैश्चापि विभूषितः ॥ १५ ॥ वपुर्वचनवस्त्राणि । विद्या विभव एव च ॥ वकारैः पंचभिर्हीनो । नरो भाति हि नो क्वचित् ॥ १६ ॥ विमृश्येति स चित्तांतः । सद्विद्यां कामरूपिणीं ॥ स्मृत्वा जातो गलत्कुष्टी । कुरूपो निंद्यवस्त्रभृत् ॥ १७ ॥ ततश्चतुःपथे गत्वो-पविष्टः पृथिवीपतिः ॥ कौतुकाद्वेष्टितो लोकै-र्गुडो मत्कोटकैरिव ॥ ॥ १८ ॥ इतश्च तत्पुराधीश-पुत्री रूपवती सती ॥ धारिणीकुक्षिभूरासी-न्नाम्ना मदनमंजरी ॥ १९ ॥ सभास्थस्य पितुः पादौ । सा प्रणम्य कुमारिका ॥ उपविष्टा पुरो भूत्वा । विनयाद्रचितांजलिः ॥ २० ॥ तदा बहुमहीपाल-मंत्रिसार्थाधिपान्वितां ॥ स्वसभां वी-

द्य शोजाढ्यां । गर्वादित्यूचिवान्नृपः ॥ २१ ॥ यतः—

स्वचित्तकल्पितो गर्वः । कस्य नाम न विद्यते ॥ उर्ध्वपद् टिट्टिभिः शेते । पादेनैकेन लावकः ॥ २२ ॥ कस्य प्रसादाद्भो लोका । धनसंपत्तिरस्ति वः ॥ सुखं च दुःखनिर्मुक्तं । महत्त्वं च गुणास्पदं ॥२३॥ तेऽवोचन् जनकल्पद्रो । त्वत्प्रसादादिदं हि नः ॥ त्वत्सौम्यदृष्ट्या चोर्वीश । जीवामो विगतव्यथाः ॥ २४ ॥ यतः—मेनांठी न देइ खीरं । न पंखवायं न पेसलं वयणं ॥ तहवित्र वड्ढंति सुत्रा । पलोइत्रा सोमदिट्ठिहिं ॥ ॥ २५ ॥ ग्र्र्थो नराणां पतिरंगनानां । वर्षा नदीनामृतुराट् तरूणां ॥ सुधर्मचारी नृपतिः प्रजानां । गतं गतं यौवनमानयंति ॥ २६ ॥ इति लोकवचः श्रुत्वा । जहास नृपनंदिनी ॥ नृपोऽपि तां स्मितमुखीं । वीक्ष्यापृच्छदिदं वचः ॥ २७ ॥ विना कारणसद्भावं । हास्यं न स्यात्सतामतः ॥ वत्से तत्कारणं ब्रूहि । चित्तसंदेह कारकं ॥ २८ ॥ सावोचत्तात सत्यं मे । वचः शृणु मदं त्यज ॥ छंदानुवर्ती लोकोऽय—मलीकं वक्त्यदो वचः ॥

॥ २९ ॥ सर्वत्र सुलभा राजन् । पुमांसः प्रियवादिनः ॥ अप्रियस्य तु पथ्यस्य । वक्ता श्रोता च दुर्लभः ॥ ३० ॥

सव्वो पुव्वकयाणं । कम्माणं पावए फलविसेसं ॥ अवराहेसु गुणेसु । निमित्तमित्तं परो होइ ॥ ३१ ॥ स्वस्वकर्मानुसारेण । फलं भुंक्तेऽखिलो जनः ॥ शोभनमशोभनं वा । हेतुमात्रं परो भवेत् ॥ ३२ ॥ स्वनंदिन्या इति वचः । श्रुत्वा रोषादिलापतिः ॥ ऊचे वत्से वद कस्य । प्रसादात्त्वं सुखीत्यसि ॥ ३३ ॥

सावक् प्राचीनसत्कर्म–प्रभावेण निरंतरं ॥ विलसामि सुखं तात । तद्गर्वस्ते न युज्यते ॥ ३४ ॥ ततो नृपः स्वपुरुषा–नादिदेशेति सोंजसा ॥ कुरूपो व्याधिमान् कुष्टी । दरिद्रो बंधुवर्जितः ॥ ३५ ॥ कश्चिदेकः कुवसनः । पुमानानीयतां द्रुतं ॥ यथैषा तनया तस्य । दुर्विनीता प्रदीयते ॥ ३६ ॥ युग्मं ॥ निजप्राचीनपुण्याना–मतुलं फलमश्नुते ॥ दुर्भाषितायाश्च गिरो–ऽप्यसौ पुत्री प्रणष्टधीः ॥ ३७ ॥ तदा पुत्रीव्यतिकरं । ज्ञा-

त्वांबा धारिणी स्यात् ॥ तत्रागत्यावदद्वत्से । हितशिक्षां शुभां शृणु ॥ ३८ ॥ पितुः पुर
स्तादज्ञाना-द्विरूपं गदितं त्वया ॥ विनष्टं नास्ति चाद्यापि । किंचित्ते तनयोत्तमे ॥३९॥
लगित्वा पादयोराशु । जनकं नतवत्सलं ॥ क्षमय त्वं सतां मन्युः । प्रणामांतो हि की-
र्तितः ॥ ४० ॥ यतः—

क्रोधो द्विजस्य दानांतः । प्रणामांतो गुरोर्भवेत् ॥ वणिजः प्रियवाक्यांतः । प्राणां-
तः क्षत्रियस्य च ॥ ४१ ॥ अन्यथा दीनमुख्याय । रंकायानुपमाकृतिः ॥ त्वं दास्यसे नृ-
पेणैवं । भोगेभ्यो भ्रंसयिष्यसे ॥ ४२ ॥ इति मातुर्वचः श्रुत्वा-वोचन्मदनमंजरी ॥ मा-
तः सत्यं वदंत्या मे । यद्भवेत्तद्भवत्वलं ॥ ४३ ॥ यतः—सच्चं जसस्स मूलं । सच्चं वि-
स्सासकारणं परमं ॥ सच्चं सग्गद्दारं । सच्चं सिद्धिइसोवाणं ॥ ४४ ॥ अथ तद्वचसा क्रु-
द्धो । भूमिभृदादिशन्नरान् ॥ आनीयतां नरः कश्चित् । पूर्वप्रोक्तस्वरूपभृत् ॥ ४५ ॥ त-
थेति तैः प्रपद्याशु । भ्रमद्भिः सकले पुरे ॥ दृष्टः कनकरथस्ता-द्दगवस्थश्चतुष्पथे ॥४६॥

दान-
प्रकाशः

॥ ४५ ॥

अचिंतिति चेति स्वाम्युक्त-स्वरूपः पुरुषः खलु ॥ प्रोक्तश्च रे नृनाथस्त्वा-माकारयति तच्चल ॥ ४७ ॥ भूपः प्रोचे किमर्थं भो । ममाकारणमादरात ॥ तेऽप्यूचुर्भद्र नृपाल-स्तुभ्यं दास्यति कन्यकां ॥ ४८ ॥ नृपो ब्रवाण भो प्राज्ञा । यूयं हसथ किं हि मां ॥ दैवेन हसितं सर्व—दूषणानां निकेतनं ॥ ४९ ॥ पादप्रहारः पतिते । क्षारक्षेपः क्षते यथा ॥ न युज्यते तथा दीने । रंके हास्यं सतां सदा ॥ ५० ॥ राजपुत्र्या विवाहो मे । नैव युक्तो विचक्षणाः ॥ काकस्येव राजहंस्या । मर्त्यस्येव सुरस्त्रिया ॥ ५१ ॥ स्वसुतां यदि विज्ञोऽपि । मह्यं दास्यति भूमिभृत् ॥ तथापि नांगीकुर्वे तां । युक्तायुक्तविचारवित् ॥ ५२ ॥ यतः—

कनकभूषणसंग्रहणोचितो । यदि मणिस्त्रपुणि प्रतिबध्यते॥ न स विरौति न चाप्युपन्नासते । भवति योजयितुर्वचनीयता ॥ ५३ ॥ ततस्ते जगदुर्भद्र । नृपादेशकरा वयं ॥ युक्तायुक्तविचारं तु । वेत्ति राजा न सेवकाः ॥ ५४ ॥ इत्युक्त्वा राजपुरुषैः ।

सोऽनिच्छन्नपि नृपतिः ॥ कुष्ठैर्विनष्टसर्वांगो । मक्षिकाजालवेष्टितः ॥ ५५ ॥ उत्पाट्य रा-
ज्ञः सविधिं । नीतः प्रोक्तश्च नृपतिः ॥ निंद्येभ्योऽप्यतिनिंद्योऽसा-वानीतोऽस्ति तवाज्ञ-
या ॥ ५६ ॥ युग्मं ॥ ततोऽब्रवीन्महीनेता । हे सुते पूर्वकर्मणा ॥ आनीतोऽयं वरस्त-
त्व—ममुं वृणु सुखं श्रय ॥ ५७ ॥ इति तातवचः श्रुत्वा । हर्षोत्फुल्लतनूरुहा ॥ अनि-
च्छतोऽपि द्राक् तस्यो-च्छाय जग्राह सा करं ॥ ५८ ॥ ततो विसृष्टा भूपेन । सा गृहीत्वा
करे पतिं ॥ अदीनास्या नृपगृहा-च्चचाल श्रीरिवांगिनी ॥ ५९ ॥ चतुःपथे गता याव-
ध्धृत्वा तं राजनंदिनी ॥ तावत्तत्रापतत्कुष्ठी । कृत्वा हाहारवं क्षितौ ॥ ६० ॥ पदमात्रम-
पि मया । पुरो गंतुं न शक्यते ॥ ततस्तं दयितावोचत । स्वामिन् स्कंधं ममारुह ॥६१॥
समीहितं यतः स्थानं । नयामि त्वां जवादहं ॥ सोऽब्रवीदद्य तिष्ठावो-ऽत्रैव पंकजलोचने
॥६२॥ तदा राजकुलं गच्छन् । किंचित्कार्यवशादथ ॥ महाजनः सविनयं । विज्ञप्त इति
कुष्ठिना ॥ ६३ ॥ राजादेशो यदि भवे-त्तदा तृणकुटीमहं ॥ कृत्वा चतुष्पथस्यांत-र्जी-

दान-
प्रकाशः

॥ ४७ ॥

वामि निवसन्निह ॥ ६४ ॥ युष्माभिरयमर्थो मे । विज्ञप्यो भूपतेः पुरः ॥ दीनोपकारो
लोके हि । कस्य श्लाघ्यो न जायते ॥ ६५ ॥ यतः—श्लोकार्धेन प्रवक्ष्यामि । यदु-
क्तं ग्रंथकोटिभिः ॥ परोपकारः पुण्याय । पापाय परपीडनं ॥ ६६ ॥ दरिद्रं भर राजेंद्र ।
मा समृद्धं कदाचन ॥ व्याधितस्यौषधं पथ्यं । नीरोगस्य किमौषधं ॥ ६७ ॥ प्रपद्येति व-
चस्तस्य । करुणापूर्णचेतसा ॥ महाजनेन विज्ञप्तः । सोऽर्थो भूमिपतेस्ततः ॥ ६८ ॥ द-
योल्लासाच्च संबंधा—ज्जामातुश्च महीभृता ॥ प्रदत्तावस्थितेराज्ञा । महाजनगिरापि च ॥
॥ ६९ ॥ ततः कुटीरकं लोकैः । कृत्वा तस्य समर्पितं ॥ अन्नाद्यं च सभार्योऽस्था—त्त
त्र कुष्ठी यथा सुखं ॥ ७० ॥ अथ चित्तपरीक्षार्थं । कुष्ठी प्रोचे निजां प्रियां ॥ कः का-
ष्ठभक्षणं कुर्यात । सुभगे कुष्ठिना सह ॥ ७१ ॥ मदंगसंगात्त्वदेह—स्वरूपं च विनश्यति
॥ सुधाधवलितं गेहं । सचित्रं दीपनो यथा ॥ ७२ ॥ ततः कमपि राजानं । राजपुत्रमु-
तोत्तमं ॥ अंगीकुरुष्व हे भद्रे । सततं सुखिनी भव ॥ ७३ ॥

अथ कर्णौ स्वपाणिभ्यां । पिधायावददंगना ।। मावादीरेतद्वचनं । विद्वज्जनविगर्हितं ।। ।। ७४ ।। गतियुगलमेवोन्मत्तपुष्पोत्करस्य । त्रिनयनतनुपूजा वाथवा भूमिपातः ।। विमलकुलभवानामंगनानां शरीरं । पतिकरकरजो वा सेवते सप्तजिह्वः ।। ७५ ।। कुलस्त्रियाः कलंकः स्या-द्बिभ्रंत्या अन्यनायकं ।। पाश्चात्यसुकृतैः सम्य-गनिवार्यः सदापि हि ।। ७६ ।। या कुप्रवृत्तिः प्रथमं प्रवृत्ता । पाश्चात्यपुण्यैर्न हि हन्यते सा ।। इंदोः कलंको हरसेवयापि । जुगुप्सनीयो न हि याति यस्मात् ।। ७७ ।। या सुप्रवृत्तिः प्रथमं प्रवृत्ता । पाश्चात्यपापैर्न हि हन्यते सा ।। शवास्थिकूटैः सततं भृतापि । भागीरथी पुण्यतमैव लोके ।। ७८ ।। नाथ त्वद्देहसंपर्का-द्विनश्यंतु क्षणादपि ।। सुरक्षंत्या निजं शीलं । बाह्या मेऽवयवाः प्रिय ।। ७९ ।। प्राणभूता ह्यंतरंगाः । कुलशीलगुणा मम ।। वृद्धिं यास्यंति हे कांत । कुर्वंत्यास्तव सेवनं ।। ८० ।।

तत्त्वं पतिव्रताया मे । नाथो देवो गुरुस्तथा ।। त्वां विना नान्यमिच्छामि । गुण-

खानिमपि ध्रुवं ॥ ८१ ॥ ज्ञात्वेति निश्चयं तस्याः । सतीत्वं चोत्तरोत्तरं ॥ सस्मार नृप-
तिस्तुष्टः । स्वां विद्यां कामरूपिणीं ॥ ८२ ॥ कुटीरकस्य स्थाने स । चक्रे सौधमनुत्तरं ॥
स्फटिकोपलविभ्राजि । सप्तपंचदशभूमिकं ॥८३॥ तत्र सार्धं स्वप्रियया । पर्यंके स्वर्णनिर्मि-
ते ॥ उपविष्टश्चारुगोष्टीं । चक्रे सोऽद्भुतरूपभृत् ॥ ८४ ॥ अथ विज्ञाय जामातुः । स्व-
रूपं भुवनोत्तरं ॥ चमत्कृतांतःकरण-स्तत्रागाद्भूमिवासवः ॥ ८५ ॥ पूर्वं दृष्टं कुष्टिनं तं ।
दृष्ट्वा स्मरसहोदरं ॥ सद्यौवनं सलावण्य-मासीत्सोऽतीवविस्मितः ॥ ८६ ॥ अथ श्रीकन-
करथ-मंत्री तत्राययौ मुदा ॥ तूर्यस्वरेण ब्रह्मांडं । स्फोटयन् सर्वसैन्ययुक् ॥ ८७ ॥ सै-
न्यमध्यस्थितः कश्चि-त्तदा भट्टो विशिष्टधीः ॥ पपाठ गाथां शृण्वत्सु । लोकेषु सकले-
ष्वपि ॥ ८८ ॥ जयउ वेअड्ढनगिंद-नायगो सिद्धसयलविज्जगणो ॥ सिरिकणयरहो
राया । पीणिअपाणिगणो सूरो ॥ ८९ ॥ ततः कनकरथेना-भ्युत्थानं विदधे रयात् ॥
श्वशुरस्यातिहृष्टस्य । धारिण्याश्च विशेषतः ॥ ९० ॥ आसनादिप्रदानैश्च । प्रतिपत्तिर्वि-

निर्ममे ॥ ॥ गृहागतानां शाङ्गैर्हि । भक्तिः कार्या यथोचिता ॥ ७१ ॥ श्वशुरेणागमो-
दंते । पृष्टे सर्वं जजल्प सः ॥ श्वशुरोऽपि तदाकर्ण्य । मुख्यतां कर्मणो जगौ ॥ ७२ ॥
धारिण्यपि निजपुत्रीं । प्रशशंस मुहुर्मुहुः ॥ कृतपुण्यासि त्वं वत्से । ययेदृग् प्रापि सद्व-
रः ॥ ७३ ॥ ततः सभार्यो जामाता । सर्वसैन्यसमन्वितः ॥ श्वशुरेण महाभक्त्या । भो-
जितः पूजितश्च सः ॥ ७४ ॥ अथानुज्ञाप्य श्वशुरं । सकांतः सबलो नृपः ॥ जगाम
कनकरथः । स्वपुरं प्रवरं श्रिया ॥ ७५ ॥ अन्येद्युस्तत्पुरोद्याने । धर्मघोषमुनीश्वरः ॥
आगत्य समवासार्षीत् । ज्ञानवान् साधुसंयुतः ॥ ७६ ॥ गुरोरागमनोदंतं । श्रुत्वा संतु-
ष्टमानसः ॥ सपौरः पृथिवीपालो । वंदनार्थमुपागमत् ॥ ७७ ॥ गुरुं प्रणम्य विधिना ।
स भूपतिरुपाविशत् ॥ गुरुरप्यादिशद्धर्मं । संसारांबुधितारकं ॥ ७८ ॥ नास्त्यहिंसासमो
धर्मो । न संतोषसमं सुखं ॥ न सत्यसदृशं शौचं । शीलतुल्यं न मंडनं ॥ ७९ ॥ इ-
त्यादिदेशनां श्रुत्वा । गुरुं भूपतिरब्रवीत ॥ कथ्यतां प्राग्भवे साधो । मया किं सुकृतं कृ-

तं ॥ १०० ॥ गुरुरूचे नृप क्षेत्रे । जंबूद्वीपस्य भारते ॥ शालिग्रामे लसद्वालि-मुद्गगो-
धूमशालिनि ॥ १ ॥ कुटुंबी धनदेवाख्य-स्तत्रासीत्किल दुर्विधः ॥ तस्य भार्या यशोदे-
वी । पतिचित्तानुयायिनी ॥ २ ॥ युग्मं ॥

अन्यदा तद् गृहे धर्म-रुचिर्धर्मरुचिर्मुनिः ॥ भिक्षार्थमागाच्छुद्धात्मा । मासक्षप-
णपारणे ॥ ३ ॥ श्रद्धाभावितचेतोभ्यां । ताभ्यां साधुशिरोमणिः ॥ शुद्धान्नेन प्रत्यला-
भि । शुभं कर्म समार्जि च ॥ ४ ॥ अथ क्रमेण तौ मृत्वा । तेन पुण्येन दंपती ॥ यु-
वां जातौ महीपाल । पात्रदानाद्धि किं न हि ॥ ५ ॥ यतः—जो जाणइ ताराणं । संखं
जलहिजलचुलुअसंखं च ॥ सो जाणइ पत्तप्पिअ-धणस्स पुण्णस्स माणमिह ॥ ६ ॥
इति विज्ञाय भो राजन् । दानं भूषणपूर्वकं ॥ दूषणैर्वर्जितं देयं । साधूनां संपदां पदं
॥ ७ ॥ सत्पात्रं महती श्रद्धा । काले देयं यथोचितं ॥ धर्मसाधनसामग्री । नाल्पस्य त-
पसः फलं ॥ ८ ॥ आनंदाश्रूणि रोमांचो । बहुमानं प्रियं वचः ॥ किंचानुमोदना पात्र-

दानभूषणपंचकं ॥ ९ ॥ असत्पात्रं विलंबश्च । वैमुख्यं विप्रियं वचः ॥ पश्चात्तापश्च पंचामी । सद्दानं दूषयंत्यहो ॥ १० ॥ दानमौचित्यविज्ञानं । सत्पात्राणां परिग्रहः ॥ सुकृतं सप्रभुत्वं च । पंच प्रतिभुवः श्रियः ॥ ११ ॥

इत्थं गुरुमुखात् श्रुत्वा । जातजातिस्मृतिर्नृपः ॥ नत्वा गुरुं गतः सौव–स्थानं धर्मं चकार च ॥ १२ ॥ क्रमात्स्वपुत्रं संस्थाप्य । राज्ये भूपोऽथ सप्रियः ॥ जग्राह सुगुरोः पार्श्वे । तपस्यां सर्वसौख्यदां ॥ १३ ॥ चारित्रं निरतीचारं । तावाराध्य जिनोदितं ॥ गृहीत्वानशनं मृत्वा । जग्मतुस्त्रिदशालयं ॥१४॥ इति कनकरथस्याख्यानमेतन्निशम्य । श्रमणविलसदन्नत्यागमाहात्म्ययुक्तं ॥ विधृतविशदभावा भव्यलोकाः सदैव । प्रवरसुखनिदाने साधुदाने यतध्वं ॥ १५ ॥ इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकनककुशलगणिविरचिते दानप्रकाशे भक्तदानप्रकाशकश्चतुर्थः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ पंचमः प्रकाशः प्रारभ्यते ॥

अथ चारित्रिणां पंचा-चारभावितचेतसां ॥ उष्णादिभेदतो वारि । प्रासुकं देयमादरात् ॥१॥ दत्ते यतिभ्यो यो योग्यं । पानीयं परया मुदा ॥ स संपदमवाप्नोति । धन्यपुण्यकयोरिव ॥ २ ॥ तथाहि-जंबूद्वीपस्य भरते । स्वःपुरीसन्निभाभवत ॥ ऋद्ध्या समृद्ध्या विख्याता । नाम्ना कांतिपुरी वरा ॥ ३ ॥ तत्र मुख्यो धनाढ्येषु । श्रेष्ठी शंखाभिधः सुधीः ॥ पद्मश्रीस्तस्य भार्याभू-ल्लक्ष्मीर्लक्ष्मीपतेरिव ॥ ४ ॥ तयोर्बभूव तनया । विनयादिगुणान्विता ॥ पुण्यश्रीरभिधानेन । कलानामेकमंदिरं ॥ ५ ॥ अन्यदा जनकेनास्याः । प्रारेभे करपीडनं ॥ महर्द्ध्या धनिका येना-पेक्षंते न धनव्ययं ॥ ६ ॥ यतः—यशस्करे कर्मणि मित्रसंग्रहे । प्रियासु नारीष्वधनेषु बंधुषु ॥ धर्मे विवाहे व्यसने रिपुक्षये । धनव्ययोऽष्टासु न गण्यते बुधैः ॥ ७ ॥ तत्रौदनादिपाकस्य । किंकरौ कर्म चक्रतुः ॥ धन्यपुण्यकनामानौ । दुःपूरोदरपूर्तये ॥ ८ ॥ यतः—किं किं न कयं

को को न पुडिजं । कस्स कस्स न नामिअं सीसं ॥ दुप्भरजयरस्स कए । किं न क-
यं किं न कायव्वं ॥ ९ ॥

तदा तत्रागतं साधु-युगलं विमलं हृदि ॥ निर्दोषप्रासुकस्फार-वारिग्रहणहेतवे ॥
॥ १० ॥ तदा प्रणम्य तद् द्वंद्वं । पुण्यकेन मनस्विना ॥ तौ रोमांचितवपुषा । पृष्टावा-
गतिकारणं ॥ ११ ॥ तावूचतुर्महाभाग । शृणवागमनकारणं ॥ सार्थेन सार्धं गछंतः ।
साधवः संति भूरिशः ॥ १२ ॥ बाला वृद्धाश्च तृषिता-स्तदर्थं ह्यागताविह ॥ आवां प्रा-
सुकतंदुल-धावनोदकहेतवे ॥ १३ ॥ पुण्यकेन ततः प्रोक्तं । भावोल्लसितचेतसा ॥ कुं-
डिकासु प्रभूतं हि । वर्तते तंदुलोदकं ॥ १४ ॥ ततो यदृछया वारि । युवां गृह्णीतमंज-
सा ॥ निपतितं भवांभोधौ । निस्तारयतमेव मां ॥ १५ ॥ प्रभूतमन्नं पक्कान्नं । वर्ततेऽ-
त्रातिसुंदरं ॥ तद्दाने नाधिकारो न-स्तदेतद् गृह्यतां जलं ॥ १६ ॥ यतः—ते धन्ना जे
केवि हु । तुझं विश्नरंति भत्तभुज्जाइं ॥ अम्हाण तब नत्थि । अहिगारो ता गिण्ह-

ह इमंपि ॥ १७ ॥

ततो भ्रात्रा द्वितीयेन । धनाख्येनेति जल्पितं ॥ दंभैकजीविनोः शश्व–न्मादास्त्वं भ्रातरेतयोः ॥ १८ ॥ प्रोवाच पुण्यको भ्रात–र्मावादीरीदृशं वचः ॥ साधवो जंगमं तीर्थं । सर्वारंभविवर्जिताः ॥ १९ ॥ महाफलं स्यादेतेभ्यो । दत्तं दानं हि भक्तितः ॥ घनेन सिक्ते सत्क्षेत्रे । बीजमुप्तमिवावनौ ॥ २० ॥ इत्यादिवाक्यं भणता । तेन तत्तंदुलोदकं ॥ प्रदत्तं मुनिवर्याभ्यां । पुण्यं बह्वर्जितं जवात् ॥ २१ ॥ इतरेणाशुभं कर्म । बद्धं दुर्भाषितात्तदा ॥ द्वावप्यथ क्रमेणायु–स्तौ प्रपूर्य मृतिं गतौ ॥ २२ ॥ अथात्र भरते भूरि—भूतिभिः शोभितेऽभितः ॥ कांपिल्यनगरे श्रेष्टी । वसंताख्योऽभवद्धनी ॥ २३ ॥ रूपलावण्यविज्ञानै–र्जयंती रतिसुंदरीं ॥ तस्य प्रिया सदाचारा । नाम्नाभूद्रतिसुंदरी ॥२४॥ तौ द्वावथ समुत्पन्नौ । तस्याः कुक्षिसरोवरे ॥ युगलत्वेन सततं । पित्रोरानंददायिनौ ॥ ॥ २५ ॥ क्रमेण सुषुवे साथ । तनयौ रूपशालिनौ ॥ मुदा भद्रातिभद्राख्ये । पित्रा

नाम्नी तयोः कृते ॥ २६ ॥ पाठयामास तौ तातो । बाल्येऽपि सकलाः कलाः ॥ कारयामास च तयो—र्विवाहं वरकन्ययोः ॥ २७ ॥ अथ क्रमेण पितरौ । परलोकमितौ तयोः ॥ ततो मिथस्तत्प्रमदे । कलहं कुरुतः सदा ॥ २८ ॥ भ्रातरौ कलहं वीक्ष्य । पृथग्भूतावुभावपि ॥ धनस्य लब्ध्वा प्रत्येकं । लात्वा च स्वगृहे स्थितौ ॥ २९ ॥ यतः—

रमणीं विहाय न भवति । विसंहतिः स्निग्धबंधुजनमनसां ॥ यत्कुंचिका सुदृढमपि । तालकबंधं द्विधा कुरुते ॥ ३० ॥ दिने दिनेऽथ ज्येष्ठस्य । क्षयमेति घनं धनं ॥ भीष्मे ग्रीष्मे यथा लोके । कासारस्य लसज्जलं ॥ ३१ ॥ व्यवसायात्कनिष्ठस्य । वर्धते श्रीर्निरंतरं ॥ शुक्लपक्षे तुषारांशोः । कलानां प्रकरो यथा ॥ ३२ ॥ यतः—लक्ष्मीर्वसति वाणिज्ये । किंचिदस्ति च कर्षणे ॥ अस्ति नास्ति च सेवायां । भिक्षायां न कदाचन ॥ ३३ ॥ वणिआणं वणिज्जंमि । माहणाणं मुहंमि अ ॥ खत्तियाणं सिरि खग्गे । कारूणं सिप्पकम्मसु ॥ ३४ ॥ व्याजे स्याद् द्विगुणं वित्तं । व्यवसाये चतुर्गुणं ॥ क्षेत्रे श-

दान-
प्रकाशः
॥ ५७ ॥

तगुणं प्रोक्तं । पात्रेऽनंतगुणं भवेत् ॥ ३५ ॥ पुण्योदयाद्वर्धमानं । कनिष्ठस्य धनं सदा ॥ समीक्ष्य निजचित्तांत–र्ज्येष्ठभ्रातेत्यचिंतयत् ॥ ३६ ॥ अनेन रक्षितं मत्त–श्छन्नं नूनं घनं धनं ॥ यदेष दृश्यते लोके । धनेन धनदोपमः ॥ ३७ ॥

विमृश्येति जगौ ज्येष्ठः । कनिष्ठं भ्रातरं तदा ॥ अत्यल्पं मे धनं दत्तं । त्वया संरक्षितं बहु ॥ ३८ ॥ तदद्य देहि मे द्रव्यं । मा कुरुष्व च वंचनं ॥ यज्ज्ञैर्निंद्यते सर्वै–र्विश्वस्तद्रोहपातकं ॥ ३९ ॥ अलभ्यमपि वर्षांते । धनस्यार्धं समर्पितं ॥ ज्येष्ठभ्रातुः कनिष्ठेन । विशिष्टेन गुणव्रजैः ॥ ४० ॥ प्रतिवर्षमथ क्षीणे । धने भाग्यविपर्ययात् ॥ जग्राह द्रविणं ज्येष्ठः । कलहेन कनिष्ठतः ॥ ४१ ॥ त्रिःसप्तकृत्वो ज्येष्ठेन । गृहीतं दुर्नयाद्धनं ॥ तथाप्यतिष्टत्तन्नोऽस्य । कुतो वा पाप्मनां जयः ॥ ४२ ॥ पुण्यप्राग्भारतो लक्ष्मीः । कनिष्ठस्यैति न क्षयं ॥ वृद्धेन गृह्यमाणापि । कूपस्येव जलं जनैः ॥ ४३ ॥ अन्येद्युस्तत्र सूरीणां । निशम्यागमनं नृपः ॥ भद्रातिभद्रौ पौराश्च । वंदनार्थं ययुर्मुदा ॥४४॥

गुरुं प्रणम्य विधिना । श्रुत्वा सद्देशनामपि ॥ भूपतिर्मुनिराजं तं । पप्रच्छेति कृतांजलिः
॥ ४५ ॥ भगवन्मे पुरे तुल्य-भागद्रव्यौ सहोदरौ ॥ वसतो भिन्नगेहस्थौ । प्रोल्लसत्कु-
लजाविमौ ॥ ४६ ॥ तत्रैकस्य धनहाने-र्धनवृद्धेः परस्य च ॥ कारणं ब्रूहि नर्हिंबधि ।
संदेहं च मनोगतं ॥ ४७ ॥ इति नृपेन विज्ञप्तो । जगाद मुनिपुंगवः ॥ तयोर्व्यतिक-
रं पूर्व-भवस्य प्राग् निवेदितं ॥ ४८ ॥ ततो जातिस्मृतिबला-त्ताभ्यां पूर्वभवः स्फुटं
॥ विज्ञातो हि तथा साधु-सिंहेन कथितो यथा ॥ ४९ ॥ पश्चात्तापं चकरोच्चै-र्ज्येष्टोऽ-
थ खेदमेदुरः ॥ धिग्मां दुष्कृतकर्तारं । हर्तारं सुकृतस्य च ॥५०॥ पानीयमपि साधुभ्यो
। दीयमानं हि बंधुना ॥ निषिद्धं मयका येना-नुभवामि स तत्फलं ॥ ५१ ॥

अचिंतयद् द्वितीयोऽपि । दृश्यते भूतले महत् ॥ अहो पानीयमात्रस्य । दानस्य
फलमद्भुतं ॥ ५२ ॥ त्रिःसप्तकृत्वोऽपि मया । दत्तं ज्येष्ठस्य यद्धनं ॥ वर्धते वार्धिवेलेव ।
श्वेतपक्षे दिवानिशं ॥ ५३ ॥ ततस्तौ प्रतिपद्योभौ । श्राद्धधर्मं शुभाशयौ ॥ गुरून्नत्वा नृ-

पाद्याश्च । सर्वे जग्मुर्निजं गृहं ॥ ५४ ॥ चिरमाराध्य तौ धर्मं । पूजादानदयादिकं ॥
प्रपद्यानशनं मृत्वा । जग्मतुस्त्रिदशालयं ॥ ५५ ॥ भद्रातिभद्राभिधबंधुवृत्तं । तोयार्प-
णानर्पणसत्फलाढ्यं ॥ निशम्य भव्यैर्यतिवारिदान-विधौ विधेयः सततं प्रयत्नः ॥ ५६ ॥
इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकन-
ककुशलगणिविरचिते दानप्रकाशे पानीयदाने पंचमः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ षष्टः प्रकाशः प्रारभ्यते ॥

अथ रोगाभिभूतानां । साधूनां शीलशालिनां ॥ भैषज्यं श्रद्धया श्राद्धै-र्देयं समा-
धिहेतवे ॥ १ ॥ यतः—भेसजं पुण दिंतो । सुहपत्ते लहइ उत्तमे लाभे ॥ जह त-
ह्वाणा वीरस्स । रेवई साविआ परमा ॥ २ ॥ अतिसाराभिभूताय । श्रीवीरायार्हते मु-
दा ॥ तद्दानं रेवतीनाम्न्या । श्राद्ध्या सम्यग्ददे यथा ॥ ३ ॥ श्रावस्त्यां समवसृतो—ऽन्य-
दांतिमजिनेश्वरः ॥ सुरासुरनृसेव्यांह्रि-गौंतमादिसुशिष्ययुक् ॥ ४ ॥ नायं जिन इति

वीर-वचो विज्ञाय मन्युमान् ॥ मुमोच तेजोलेश्यां कु-शिष्यो गोशालकः प्रभोः ॥६॥
तयातिसारो दुर्दाह—ज्वरयुक्तोऽजनि प्रभोः ॥ अथ वीरो विहारेण । मिंढिकग्राममा-
सदत् ॥ ७ ॥ ध्यानकोष्ठाभिधं चैत्य-मलंचक्रे जगद्गुरुः ॥ रोगग्रस्तशरीरत्वा-दतिदुर्ब-
लतां गतः ॥ ८ ॥ तदा प्रणम्य श्रीवीरं । गच्छंतो गगने सुराः ॥ इत्यन्योन्यं वदंतिस्म
। खेदमेदुरचेतसः ॥ ९ ॥ स्तोकैरेव दिनैर्वीर-स्वामी कालं करिष्यति ॥ नादत्ते भेषजं
किंचित । स यत्तदुपशांतये ॥ १० ॥ तद्वचो मालुकाकच्छे । कायोत्सर्गविधायिना ॥ शु-
श्रुवे जिनशिष्येण । सिंहेन वरसाधुना ॥ ११ ॥

अचिंति चाहो जल्पंति । सत्यमेते दिवौकसः ॥ गोशालकेनापि पुरा । गदितं
चेति वर्तते ॥ १२ ॥ मत्तेजोलेश्यया दग्ध-देहश्छद्मस्थ एव सन् ॥ अकाले वर्धमान
त्वं । नूनं कालं करिष्यसि ॥ १३ ॥ विचिंत्येति स दुःखार्तो । मालुकाकच्छमध्यगः ॥ वि-
ललाप स्वरेणोच्चै-र्गुरुस्नेहो हि दुस्त्यजः ॥ १४ ॥ विज्ञाय तद्व्यतिकरं । ज्ञानेन त्रिज-

गद्गुरुः ॥ आकारयामास सिंहं । साधुं संप्रेष्य पार्श्वतः ॥ १५ ॥ आगत्य स्वामिनः पा-
द-पद्मयोः स महामुनिः ॥ लगित्वा स्वशिरो गाढं । प्रवृत्तो रोदितुं पुनः ॥ १६ ॥ उ-
वाच भगवान् सिंहं । किं रोदषि वृथा मुने ॥ अतः परं हि केवलि—पर्यायेण मही-
तले ॥ १७ ॥ अहं षोडश वर्षाणि । विचरिष्याम्यसंशयं ॥ रोगा अपि गमिष्यंति ।
कालेन स्वयमेव मे ॥ १८ ॥ युग्मं ॥

श्रुत्वेत्यर्हद्वचः सिंहो । जगौ सत्यं वचो हि वः ॥ तथाप्यादिश्यतां कोऽप्यु-पायो
रोगोपशांतये ॥ १९ ॥ स्वामी चोवाच यद्येवं । तर्हि वत्स प्रयाहि भोः ॥ अत्रैव श्रेष्टि-
तनया—रेवतीश्राविकागृहे ॥ २० ॥ तत्रैकं चारु कुष्मांड—कटाहौषधमद्भुतैः ॥ अनेक-
द्रव्यैः संयुक्तं । मदर्थं कृतमस्ति यत् ॥ २१ ॥ आनेतव्यं त्वया नैव । तदाधाकर्मदूषितं
द्वितीयं तु बीजपूर—कटाहौषधमस्ति यत ॥ २२ ॥ तदानय महाभाग । स्वकुटुंबकृते कृ-
तं ॥ तथेत्यथ प्रपद्यासौ । सिंहस्तद्गृहमागमत् ॥ २३ ॥ त्रिभिर्विशेषकं ॥ अभ्युत्थानं

तया कृत्वा । वंदित्वा तत्पदद्वयं ॥ समागमनहेतुं स । पृष्टो योजितहस्तया ॥ २४ ॥ सिं-
हसाधुर्जगादैवं । भगवद्रोगशांतये ॥ भेषजाय तव गृहे । समागां श्राविकोत्तमे ॥२५॥
परं त्वयौषधं वीर—निमित्तं कृतमस्ति यत् ॥ तन्न देयं कुटुंबार्थं । कृतं यत्तच्च देहि मे
॥ २६ ॥ अथो निशम्य तद्वाक्यं । प्रोचे विस्मितया तया ॥ रहः कृतं मया ह्येत—त्त्व-
या ज्ञातं कथं मुने ॥ २७ ॥ मुनिरूचे मया ह्येत—द्विज्ञातं भगवन्मुखात् ॥ विना सूर्यं
महीपीठे । प्रकाशं कुरुते हि कः ॥ २८ ॥ ततः प्रमोदप्राग्भार—प्रोद्भुतपुलकांचिता ॥
चिंतयंतीति धन्याहं । स ददावौषधं मुनेः ॥ २९ ॥

पात्रदानप्रभावाच्च । शुभभावात्तदा तया ॥ समर्जितं तीर्थकर—कर्म शर्मनिबंधनं ॥
॥३०॥ यतः—यदपि तदपि शुद्धं चंदनावत्प्रदत्तं । झटिति फलति पात्रेऽन्यत्र नो चार्व-
पि स्वं ॥ जलधिजलमपेयं वारिवाहेऽमृतीस्या—न्मधुरमपि हि दुग्धं पन्नगास्ये विषीस्या-
त् ॥ ३१ ॥ दुग्धं देहानुसारेण । कृषिर्मेघानुसारतः ॥ लाभो नीव्यनुसारेण । पुण्यं भा-

वानुसारतः ॥ ३२ ॥ पात्रे त्यागी गुणे रागी । भोगी परिजनैः सह ॥ शास्त्रे बोद्धा रणे योद्धा । पुरुषः पंचलक्षणः ॥ ३३ ॥ तदा तदंगणे चारु-सुवर्णस्य प्रहर्षितैः ॥ सार्धद्वादशकोटीनां । वृष्टिश्चक्रे सुपर्वभिः ॥ ३४ ॥ गगने दुंदुभिनाद-श्चेलोत्क्षेपस्तथाभवत् ॥ अहो दानमहो दान-मित्युद्घोषः सुरैः कृतः ॥ ३५ ॥ श्राद्धधर्मं समाराध्य । रेवती श्राविकोत्तमा ॥ मृत्वा समाधिना स्वर्गे । जगामाद्भुतशर्मदं ॥ ३६ ॥ इहैव भरतक्षेत्रे । भावी सप्तदशो जिनः ॥ उत्सर्पिण्यां क्रमेणास्या । जीवः समाधिसंज्ञकः ॥३७॥ तेनौषधेन भगवान् । नीरोगः समजायत ॥ विजहार धरापीठे । चिरं भव्यप्रबोधकृत् ॥ ॥ ३८ ॥ श्रीरेवतीचारुकथां निशम्य । सदौषधत्यागफलेन युक्तां ॥ भव्याः सदा साधुसमाधिकारि-भैषज्यदाने कुरुतातियत्नं ॥ ३९ ॥ इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकनककुशलगणिविरचिते दानप्रकाशे भेषजदाने षष्ठः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ सप्तमः प्रकाशः प्रारभ्यते ॥

अथ श्वेतं रम्यतरं । वस्त्रं देयं बुधैर्गुरोः ॥ शीतातपापनोदाय । प्रव्रज्यापालनाय च ॥ १ ॥ येषां गुणमयं जन्म । परेषां गुह्यगुप्तये ॥ नीरसान्यपि रोचंते । कर्पासस्य फलानि मे ॥ २ ॥ साधूनां गुणयुक्तानां । वस्त्रविश्राणनेऽधुना ॥ कथा ध्वजभुजंगस्य । कथ्यते मयकोत्तमा ॥ ३ ॥ जंबूद्वीपस्य भरत-क्षेत्रे शस्यर्द्धिबंधुरे॥ देशोऽभूत्कमला-वासो । विख्यातो मालवाभिधः ॥ ४ ॥ तत्र ग्रामोऽस्त्युज्जयिनी-पार्श्वस्थो गोकुलाकुलः ॥ शालिग्रामाभिधः शालि-शालिगोधूमशोभितः ॥५॥ तत्राभूत्सिंहपालाख्यः । ख्यातः कश्चिद्धनान्वितः ॥ तस्य प्रिया यशोदेवी । राजपालस्तयोः सुतः ॥ ६ ॥ स सर्वगुणयु-क्तोऽपि । द्यूतव्यसनदूषितः ॥ कलाभिः कलितः कृष्ण-लांछनेन यथा विधुः ॥ ७ ॥ अन्येद्युस्तस्य जनकः । परलोकमगादथ ॥ राजपालोऽपि स्वछंद-वृत्त्या प्रावर्ततान्वहं ॥ ॥ ८ ॥ अहारि तेन द्यूतेन । सर्वं वेश्मस्थितं धनं॥ स्युः कदापि मनुष्याणां । गुणाय

व्यसनानि किं ॥ ९ ॥ यतः—क्षत्राणां हयशस्त्रबंदिषु भवेद् द्रव्यव्ययः प्रायशः । शृंगारे पण्ययोषितां च वणिजां पण्ये कृषौ क्षेत्रिणां ॥ पापानां मधुमांसयोर्व्यसनिनां स्त्रीद्यूतमद्यादिके । ब्रूमध्ये कृपणात्मनां सुकृतिनां श्रीतीर्थयात्रादिषु ॥ १० ॥

द्यूताद्राज्यविनाशनं नलनृपः प्राप्तोऽथवा पांडवा । मद्यात्कृष्णनृपश्च राघवपिता पापर्द्धितो दूषितः ॥ मांसाच्छ्रेणिकभूपतिश्च नरके चौर्याद्विनष्टा न के । वेश्यातः कृतपुण्यको गतधनोऽन्यस्त्रीरतो रावणः ॥ ११ ॥ जा जूए धणआसा । मुन्निआसीसंमि रूविआ आसा ॥ दासीसु घरवासा । तिन्निवि आसा खासाफासा ॥ १२ ॥ करघट्टा नहपंरुरा । सज्जण दूरी होय ॥ सूना देउल सेवीएं । तुम्ह पसाए जुम्ह ॥ १३ ॥ भोजनायान्यदा गेहे । समेतोऽभाणि सोंबया ॥ भुक्त्वा रंधनयोग्यानि । काष्ठान्यानय काननात् ॥ १४ ॥ तथेति मातुर्वचनं । प्रतिपद्य महोद्यमः ॥ पर्शुमादाय विपिने । निर्भीकः स ययौ जवात् ॥ १५ ॥ भ्रमता तेन तत्रैको । ददृशे पादपो महान् ॥ यावत्प्रवर्त्तते तस्य

छेदनाय स साहसी ॥ १६ ॥ तावद्यक्षेण तदधि-ष्ठायकेनेति जल्पितं ॥ मदालयमिमं
वृद्धं । मा भांक्षीः पुरुषोत्तम ॥ १७ ॥ युग्मं ॥ तुष्टोऽस्मि ते मनोऽभीष्टं । वृणीष्व वरमु-
त्तमं ॥ सोऽवोचत्त्वं यदा याचे । तदा दद्याः सुरेश्वर ॥ १८ ॥ त्वदंतिके तिष्टतु स । न्या-
सीभूतोऽधुना वरः ॥ एवमस्त्विति यक्षोऽपि । प्रतिपद्य तिरोदधे ॥ १९ ॥

राजपालोऽपींधनानि । लात्वा च स्वगृहं ययौ ॥ द्यूतेन तेनान्यदाहारि । परिधानां-
शुकं निजं ॥ २० ॥ ध्वजस्य स्तंभमुत्तीर्णं । पतितं देवसद्मनि ॥ वीक्ष्य तद् द्राक् परि-
हितं । दुःस्थो हि कुरुते न किं ॥ २१ ॥ ततश्च लोकैः स ध्वज-भुजंगाख्यो निवेदितः
॥ सोऽथाप्राप्तौ भोजनस्य । ययावुज्जयिनीं पुरीं ॥२२॥ तत्रापि दीव्यन् द्यूतेन । तेना-
हारि धनं बहु ॥ द्यूतकारभयान्नष्ठा । सरःपाल्यां ययावसौ ॥ २३ ॥ तत्र स्थिते देवकु-
ले । स गत्वोपाविशत्तदा ॥ पथा तेन समायातो । भामहाख्यो हि सार्थपः ॥ २४ ॥
पृष्टवाह्यवृषश्रेणि-मध्यादेकेन पृष्टतः ॥ वृषेण पातिता गोणी । तटाके पिबता जलं ॥

॥ २५ ॥ दृष्टा ध्वजभुजंगेन । सा पतंती सरोवरे ॥ परेण न पुनः केना-प्यहो विधि-
विजृंभितं ॥ २६ ॥ भारशून्यमथो दृष्ट्वा । तं वृषं सार्थनायकः ॥ गोणीं विलोकयामा-
स । सर्वत्र विहितादरः ॥ २७ ॥ परं न दृष्टा कुत्रापि । सा गोणी धनसंयुता ॥ किंत्वे-
को वीक्षितस्तत्र । स्थितो ध्वजभुजंगकः ॥ २८ ॥ सार्थवाहोऽथ तं प्रोचे । भद्र कुत्रापि
हि त्वया ॥ वृषभस्कंधतो गोणी । पतंती वीक्षिता न वा ॥ २९ ॥

तां विना सर्वसार्थोऽयं । निधनं यास्यति ध्रुवं ॥ बाह्याः प्राणा नृणामर्थो । हरता
तं हि ते हृताः ॥ ३० ॥ सौवर्णटंककैर्गोणी । सा भृतास्ति महामते ॥ सकलस्यापि सा-
र्थस्य । सर्वस्वं विद्यतेऽत्र नः ॥ ३१ ॥ अतो यदि भवेद् दृष्टा । सा त्वया तर्हि सत्वरं ॥
निगद्यतां च परमो-पकारः क्रियतां हि नः ॥ ३२ ॥ यतः—दानं वित्तादृतं वाचः ।
कीर्तिधर्मौ तथायुषः ॥ परोपकरणं काया-दसारात्सारमुद्धरेत् ॥ ३३ ॥ तथा—पिबंति
नद्यः स्वयमेव नांभः । खादंति न स्वादुफलानि वृक्षाः ॥ पयोमुचां किं क्वचिदस्ति श-

स्यं । परोपकाराय सतां सन्नृद्धिः ॥ ३४ ॥ अथ लोभं परित्यज्या-वोचद् ध्वजभुजंगकः ॥ सरोंतः पतिता सास्ति । सार्थराट् वीक्ष्यतामितः ॥ ३५ ॥ विस्मितः सार्थनाथोऽथ । चिंतयामास चेतसि ॥ अहो निर्लोभताधिक्यं । महापुंसोऽस्य दृश्यते ॥ ३६ ॥ उपकर्ता स्वयं कश्चि-दपकर्ता च कश्चन ॥ चैत्रस्तरुषु पत्राणां । कर्ता हर्ता च फाल्गुनः ॥ ॥ ३७ ॥ प्रीतिर्जन्मनिवासतोऽप्युपकृते संबंधतो लिप्सया । विंध्ये हस्तिवदंबुजे मधुपवच्चंडे पयोराशिवत ॥ अब्दे चातकवद्भवेदसुमतां सर्वत्र नैमित्तिकी । या निष्कारणबंधुता शिखिवदंभोदे क्वचित्सा पुनः ॥ ३८ ॥ इत्यादि चिंतयित्वांत-रवदत्सार्थनायकः ॥ एतेषां टंककानां त्वं । गृहाणार्धं शुभाशय ॥ ३९ ॥ सोऽवग् सार्थपते सारा । परोपकृतिरस्तु मे ॥ धनं गृह्णामि चेत्तर्हि । विक्रीता सा भवेद् ध्रुवं ॥ ४० ॥

सार्थनाथोऽब्रवीद्भद्र । सर्वं मेऽभूद्गतं धनं ॥ ततो मम समाध्यर्थ-मर्धं द्रव्यं गृहाण भोः ॥ ४१ ॥ तेनेत्युक्तोऽपि स यदा । किंचिद्गृह्णाति नो तदा ॥ तेन तस्य ददे

स्वर्णा—ष्टापदो रत्नशारियुक् ॥ ४२ ॥ अत्याग्रहवशादेतं । लचौ ध्वजभुजंगकः ॥ दा-
क्षिण्यं नैव लुंपंति । संतो हि प्रार्थिता भृशं ॥ ४३ ॥ अचिंतयत्स निकटे । चैतद्वस्तु
मनोहरं ॥ नैव स्थास्यत्येकमपि । दिनं व्यसनिनो मम ॥ ४४ ॥ तदेतत्खलु कस्यापि ।
सज्जनस्य महीपतेः ॥ ढौक्यते क्रियते तेनो—पकारः परमो मया ॥ ४५ ॥ चिंतयित्वे-
ति तेनोचे । नामहाख्यः स सार्थपः ॥ गंतासि कुत्र देशे त्वं । व्यापारार्थं महामते ॥
॥ ४६ ॥ अथोचे तेन यास्यामि । दक्षिणस्यां दिशि ध्रुवं ॥ तदा ध्वजभुजंगोऽपि । त-
मवोचन्महामनाः ॥ ४७ ॥ तद्देशाधिपतेरेत—च्छारिपट्टादि शोभनं ॥ समर्पणीयं सार्थेश ।
मदीयं प्राभृतं त्वया ॥ ४८ ॥ तद्वचः प्रतिपद्याथ । सार्थनाथः क्रमात्पुरं ॥ क्षितिप्रतिष्ठि-
तं प्रापा—रिमर्दननृपाश्रितं ॥ ४९ ॥ गृहीत्वा शारिपट्टादि—प्राभृतं भूपतेः पुरः ॥ ढौक-
यित्वा च सार्थेशो—ऽवोचत्तं वदतां वरः ॥ ५० ॥ स्वामिन् ध्वजभुजंगेन । कुमारेण महा-
त्मना ॥ प्राभृतं प्रेषितं युष्म—दर्थमेतदवंतितः ॥ ५१ ॥ श्रुत्वेत्यचिंतयद्भूपः । स महापु-

रुषः खलु ॥ महार्धं मेऽप्यदृष्टस्य । प्राभृतं प्राहिणोति यः ॥ ५२ ॥ विमृश्येत्यवदत्क्षोणी-नायकः सार्थनायकं ॥ करिपंचशतीं तस्य । ममोपायनमर्पयेः ॥ ५३ ॥

इत्युक्त्वा वसुधापाल-स्तस्य सार्थपतेर्ददौ ॥ गजपंचशतीं रम्यां । शैलोत्तुंगां मदोद्धतां ॥ ५४ ॥ वर्षाकाले नद्यः । शयने प्रमदा मदोद्धताः करिणः ॥ बालत्वेऽपि च तनया । अविनीता एव शोभंते ॥ ५५ ॥ तेनापि सार्थवाहेन । दिनैः कतिपयैरथ ॥ प्राप्ता हस्त्यादियुक्तेन । श्रीमदुज्जयिनी पुरी ॥ ५६ ॥ भूपवृत्तांतमखिलं । प्रणिगद्य स सार्थराट् ॥ तस्मै ध्वजभुजंगाया-र्पयामास मतंगजान् ॥ ५७ ॥ प्रोचे ध्वजभुजंगोऽथ । गंतव्यं कुत्र सार्थप ॥ सोऽब्रवीत्कन्यकुब्जाख्ये । नगरे गमनं मम ॥ ५८ ॥ भूयो ध्वजभुजंगेन । प्रोचे सार्थपतेऽस्ति कः ॥ तत्र प्रधानपुरुषो । लोकख्यातो महामतिः ॥ ॥ ५९ ॥ सार्थेशोऽप्यवोचत्तत्र । प्रधानः सकलो जनः ॥ तथाप्येका हि गणिका । देवदत्ताभिधास्ति या ॥ ६० ॥ अतिप्रधानभुवना-द्भुतरूपरमानिधिः ॥ सा विद्यते गुण-

वती । लावण्यरसनिम्नगा ॥ ६१ ॥ युग्मं ॥ ततो ध्वजभुजंगोऽसौ । सार्थनाथं जगावि-
ति ॥ इमे मे हस्तिनस्तस्या । देया मद्वचसा त्वया ॥ ६२ ॥ प्रपद्य तद्वचः सार्थ-नाय-
कः क्रमयोगतः ॥ कन्यकुब्जपुरं प्राप । भूषितं देवदत्तया ॥ ६३ ॥ तुभ्यं ध्वजभुजंगेन
। देवदत्ते मतंगजाः ॥ प्रोत्तुंगाः प्रेषिताः सं-त्युज्जयिनीपुरवासिना ॥६४॥ उक्त्वेति सा-
र्थवाहेन । तस्यै ते हस्तिपुंगवाः ॥ दत्तास्तया गृहीताश्च । हृष्टयावासमागताः ॥ ६५ ॥
॥युग्मं॥ नृपेण सार्धं दीव्यंती । पूर्वमेषा पणांगना ॥ हारयामास करिणा-मिह पंचश-
तीं जवात् ॥ ६६ ॥ गजाभावेन तन्मूल्यं । सा दत्ते वसुधापतेः ॥ परं तन्नैव गृह्णाति ।
सोऽत्यर्थं प्रार्थितोऽपि हि ॥ ६७ ॥ तद्रूपमोहितस्तां स्वी-कर्तुमिच्छन् नृपो जगौ ॥ या-
वन्मूर्ता मम गजा । न स्युर्दत्तास्त्वया शुभे ॥ ६८ ॥ तावदन्यनराद्वृत्ति-र्न कार्या भा-
टकात्त्वया ॥ केवलं तिष्ठ मद्गेहे । मदायत्ता मदाज्ञया ॥ ६९ ॥ युग्मं ॥ ततः सा गज-
चिंताब्धि-निमग्नास्थाद्दिवानिशं ॥ वारिभूमौ करिणीव । ध्यायंती निर्गमं परं ॥ ७० ॥

|| ७२ || श्चं महासंकटेऽस्मिन् । तया पतितया तदा ॥ गजा हर्षकराः प्राप्ताः । समये समुपागताः ॥ ७१ ॥ काले लब्धं तृणं वारि । वचश्च सुखदं भवेत् ॥ गुणैर्विरहितं शश्वत् । सर्वेषामपि देहिनां ॥ ७२ ॥ यतः—अवसरे खलु लोके । तृणाय नृपैः प्रसार्यते स्वकरः ॥ अनवसरे गुणवानपि । हृदयादुत्तार्यते हारः ॥ ७३ ॥ करचुलुअपाणिएणवि । अवसरदिन्नेण मुच्छिओ जियइ ॥ पच्छामुआण सुंदरि । घडसयदिन्नेण किं तेण ॥७४॥

अवसरपठिता वाणी । गुणगणरहितापि शोभते पुंसां ॥ वामे गर्दभनाद-श्चित्तप्रीत्यै प्रयाणे स्यात् ॥ ७५ ॥ अवसर आव्ये उचित कर । अवसर लही म भूल ॥ धन खूटुं वली आवसे । अवसर लहीस न मूल ॥७६॥ किं पुनः करिणो राज—योग्या लक्षणलक्षिताः ॥ बंधमोक्षकरास्तस्या । हर्षदाः स्युः कथं न ते ॥ ७७ ॥

अथ सा सार्थपं प्रोचे । कुमारः क्वास्ति सोऽधुना ॥ कियांश्च विद्यते तस्य । परिवारो मनोहरः ॥ ७८ ॥ सोऽवोचदेककोऽवंत्यां । विद्यते सुभ्रु सद्गुणः ॥ त्वत्स्वरूपं च

तस्याग्रे । मया सर्वं निवेदितं ॥ ७९ ॥ सा पुनस्तं जगादैव–मतिविस्मितमानसा ॥ एतावतां गजानां हि । प्राप्तिस्तस्याभवत्कथं ॥ ८० ॥ तेनापि तस्याः पुरत–स्तस्य व्यतिकरोऽखिलः ॥ प्रोक्तस्ततः प्रहृष्टा सा । वदतिस्म तमादरात् ॥ ८१ ॥ स पुमान्नैव सामान्यो–वदान्यो दृश्यते महान् ॥ आपन्निस्तारको जातो । यो मे सिंधुरदानतः ॥ ८२ ॥ ततो भवन्मुखेनैन–मेवं विज्ञपयाम्यहं ॥ स्वामिन्ममोपरि कृपां । विधायोच्चैर्महाशय ॥ ॥ ८३ ॥ अत्रैकशः समेतव्यं । ममाग्रहवशात्त्वया ॥ आत्मीयं विनयं नाथ । यथाहं दर्शयामि ते ॥ ८४ ॥ युग्मं ॥

तद्वचः सार्थवाहेन । प्रतिपन्नं तयापि सः ॥ सत्कृतः सारवस्त्रादि–दानेन स्तवनेन च ॥ ८५ ॥ अथ सा राजसदनं । गत्वा नृपं व्यजिज्ञपत् ॥ मां स्वाज्ञाबंधनान्मुंच । गृहाणेमान् गजान् पुनः ॥ ८६ ॥ इत्युक्त्वा सार्पयामास । तान् गजान् वसुधापतेः ॥ राजाप्यवोचद्भो भद्रे । कुतः प्राप्ता इमे त्वया ॥ ८७ ॥ शशंस कामिनी स्वामिन् । श्री-

मडुज्जयिनीपुरात् ॥ मह्यं ध्वजभुजंगेना-मी मत्ताः प्रहिता गजाः ॥ ८८ ॥ ततोऽनृणा सा स्ववशा । जाता सार्थाधिपोऽप्यथ ॥ क्रमात्क्रियद्भिर्दिवसै-र्ययावुज्जयिनीं पुरीं ॥८९॥ यद्यद्गणिकया स्वस्य । प्रसादेन समर्पितं ॥ तत्तध्ध्वजभुजंगाय । दर्शयामास सार्थप ॥ ॥ ९० ॥ विज्ञप्तं यद्गणिकया । तन्निवेद्य च सोऽवदत् ॥ तत्राशु गंतुं ते युक्तं । वर्तते समयोऽधुना ॥ ९१ ॥ धत्ते गाढं त्वयि स्नेहं । सा सर्ववनिताग्रिणी ॥ त्वां विना मनसाप्यन्यं । पुरुषं नैव वांछति ॥ ९२ ॥ इत्युक्त्वा सार्थवाहोऽथ । स्वस्थानमगमन्मुदा ॥ ध्वजोऽपि चिंतयामास । तद्गुणैर्विस्मितोऽधिकं ॥ ९३ ॥ ममागमनमिछंत्या । किमपि प्राभृतं तया ॥ अस्मद्योग्यं न प्रहितं । तत्र गछाम्यहं ततः ॥ ९४ ॥ भवेद्विलोकिता सा त-त्पुरशोभाप्यनेकधा ॥ विमृश्येति ततोऽचालीत् । स साहसमहाधनः ॥ ९५ ॥

दिनैः कतिपयैः कन्य-कुब्जदंगांतिकं गतः ॥ वापीखननमारब्धं । तदा तत्र महीभृता ॥ ९६ ॥ द्रम्माणां नव लक्षाणि । दत्वा पंचकुलं वरं ॥ नृपेण मुक्तं तत्रास्ति

। दीर्घिकाकार्यसिद्धये ॥ ९७ ॥ बहुकर्मकरास्तत्र। धूलिं वहंति मौलिभिः ॥ खनंति के-ऽपि कुद्दालै-र्यत्नेन महता महीं ॥ ९८ ॥ पाषाणान् केऽपि टंकौघै-र्घटयंति दिवानिशं ॥ पूरयंति च पानीयं । घटैः केचन भूरिभिः ॥ ९९ ॥ तत्र ध्वजभुजंगोऽपि । भोजनार्थी समागतः ॥ प्रवृत्तः कर्म कर्तुं च । धूलीवहनपूर्वकं ॥ १०० ॥ जघन्यानां मध्यमाना-मुत्तमानां परीक्षया ॥ दीयते कर्मकाराणां । भोजनं हि यथोचितं ॥ १ ॥ हीना मध्याश्चोत्तमाश्च । योषितः परिवेषिकाः ॥ कल्पितास्त्रिविधाः संति । त्रिषु पंक्तिष्वहर्निशं ॥ २ ॥ अथ भोजनवेलायां । सोऽपि ध्वजभुजंगकः ॥ जघन्यभृत्यपंक्तौ च । भोजनायोपवेशितः ॥ ३ ॥ मलिना कापि बीभत्सा । दुःस्थरंडासमस्तनी ॥ लंबोदरी स्थूलकेशी । कृष्णा कर्कशभाषिणी ॥ ४ ॥ नाशिकामललिप्तेन । करेण स्पृशती मुहुः ॥ निजोत्तरीयं मूर्तेवा-ऽलक्ष्मीर्दोषनिकेतनं ॥ ५ ॥

ईदृक्कर्मकरी तस्य । परिवेषणकर्मणि ॥ उद्यता समभूत्तां च । दृष्ट्वा ध्वजभुजं-

गकः ॥ ६ ॥ प्रधानपुरुषं तत्र । नियुक्तमवदत्तदा ॥ यादृशं तादृशं मेऽस्तु । भोजनं तु-
दपूर्तिकृत् ॥ ७ ॥ त्रिभिर्विशेषकं ॥ परं भणामि वो ह्येत-द्वीनसैषाधिकं वशा ॥ अतो
मे भोजनेच्छानो । जायते भो नरोत्तम ॥ ८ ॥ ततः कापि वरा नारी । यदि स्यात्परि-
वेषिका ॥ तदा मे भोजनं सम्यग् । रोचते नान्यथा खलु ॥ ९ ॥ श्रुत्वेति तद्वचः सर्वे
। प्रधानपुरुषास्तदा ॥ जहसुर्जगदुश्चैवं । मिथो वक्त्रोष्टिकाजुषः ॥ १० ॥ देवदत्तास्य
गणिका । भोजनं दातुमेष्यति ॥ ध्वजोऽवदन्मां किं यूयं । पुरुषा हसथाऽनयात् ॥११॥
यदि सा भोजनं दातुं । समेति गणिका मम ॥ हारयत तदा यूयं । किं वदंतु मनीषि-
णः ॥ १२ ॥ असंभाव्यमिदं ज्ञात्वा । तेऽप्यूचुः शृणु भद्र भोः ॥ हारयामो वयं गेह-
सर्वस्वं हि तदा ध्रुवं ॥ १३ ॥ परं ब्रूहि तदा भोस्त्वं । किं हारयसि सोऽवदत् ॥ यद्युपे-
त्यात्र सा दत्ते । नैव मे भोजनं जनाः ॥ १४ ॥ हास्यामि तदा सौव—मस्तकं नात्र सं-
शयः ॥ एतदेव धनं मेऽस्ति । द्वयोर्जाता हि साक्षिणः ॥ १५ ॥ ध्वजोऽथ ज्ञापयामा-

स । तस्यै स्वागमनं मुदा ॥ प्रेषयित्वा नरं कंचित । पुरांतर्गणिकागृहे ॥ १६ ॥

ततः संभ्रांतचित्ता सा । तत्रागत्य कृतांजलिः ॥ कुमारं गणिका प्राह । स्वामिन्नागम्यतां गृहे ॥ १७ ॥ ध्वजः प्रोवाच नो भद्रे । विधायात्रैव भोजनं ॥ मंदिरे ह्यागमिष्यामि । तेऽहं तरललोचने ॥ १८ ॥ ततस्तया स्वयं तस्मै । चक्रे मर्दनमुत्तमं ॥ सुगंधैर्विविधैस्तैलैः । स्वयमानायितैर्गृहात् ॥ १९ ॥ तैलाभ्यंग ऋणछेदः । कन्यामरणमेव च ॥ आदौ भवंति दुःखाय । परिणामे सुखाय च ॥ २० ॥ साकारयत्ततः स्नानं । कवोष्णैः शीतलैर्जलैः ॥ पावित्र्यहेतुं दंतानां । सदा गुणकरं वरं ॥ २१ ॥ यतः—

दंतानां मज्जनं श्रेष्टं । कर्णानां दंतधावनं ॥ शिरोऽभ्यंगश्च पादानां । पादाभ्यंगश्च चक्षुषोः ॥ २२ ॥ तथा—स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनं । शौचस्यायतनं मलापहरणं संवर्धनं तेजसां ॥ रूपोद्योतकरं सुखस्वरकरं कामाग्निसंदीपनं । स्त्रीणां मन्मथमोहनं बलकरं स्नाने दशैते गुणाः ॥ २३ ॥ गोशीर्षचंदनैश्चारु—घनसारविमि-

श्रितैः ॥ विलेपनं तयाकारि । तस्य देहस्य देववत् ॥ २४ ॥ विविधैर्भूषणैः सार—वसनैस्तस्य विग्रहं ॥ भूषयित्वा भोजनाय । सोपवेशयतिस्म तं ॥ २५ ॥ मोदकादिकपक्वान्नं । कूरं दालियुतं वरं ॥ गोरसं शाकसंयुक्तं । परिवेषयतिस्म सा ॥ २६ ॥ यतः—
आदौ तावन्मधुरं । मध्ये तिक्तं ततः कटुकं ॥ दुर्जनमैत्रीसदृशं । भोजनमिछंति नीतिज्ञाः ॥ २७ ॥ सा वातं वीजयामास । भुंजानस्य मनस्विनी ॥ ध्वजस्य व्यजनेनैव । सुवर्णदंडशालिना ॥ २८ ॥

तद् दृष्ट्वा चिंतितं लोकैः । सर्वैर्नूनं सुविस्मितैः ॥ प्रछादितस्वरूपोऽयं । दृश्यते कोऽपि निर्जरः ॥ २९ ॥ विना हेतुं राजकुले । या न याति कदाचन ॥ दृशापि वीक्षते या नो । कुमारान् स्मररूपिणः ॥ ३० ॥ आगत्य पादचारेण । पथिकस्यास्य संमुखं ॥ विधत्ते विनयं सापि । भोजनादिकयुक्तिभिः ॥ ३१ ॥ युग्मं ॥ रथाश्वादिकसामग्रीं । स्वगृहात्समुपागतां ॥ समीक्ष्य हृष्टा पण्यस्त्री । प्रोचे ध्वजभुजंगकं ॥ ३२ ॥ प्रसादः क्रि-

यतां वेश्मा-गमनेन प्रभोऽधुना ॥ स ततो रथमारूढ-स्तया गणिकया सह ॥ ३३ ॥
वेश्यावचनतो राज्ञा । कारितां सकले पुरे ॥ पश्यन् शोभां विवेशेंऽडः । शच्या सह य-
था पुरीं ॥ ३४ ॥ युग्मं ॥ यो गजानां पंचशतीं । प्रेषयित्वा ह्यमोचयत् ॥ राजाज्ञाबंध-
नाद्वेश्यां । सोऽयं जीयाध्वजश्चिरं ॥ ३५ ॥ इत्यादिलोकवाक्यानि । शृण्वन् हर्षकरा-
णि सः ॥ जगाम राजभवनं । ननाम वसुधाधिपं ॥ ३६ ॥ युग्मं ॥

देवदत्तावदत्ताव-द्देव ध्वजभुजंगकः ॥ अयं नमति वः पादान् । भूतलन्यस्तमस्त-
कः ॥३७॥ मदर्थे प्रेषिता येन । गजपंचशती प्रभो ॥ राजावग् गौरवार्होऽयं । तव नूनं
मनस्विनि ॥ ३८ ॥ भूयोऽप्यवोचत्सा भूपं । प्रार्थये नाथ किंचन ॥ राज्ञोक्तमुच्यतां
भद्रे । यच्च चेतसि रोचते ॥ ३९ ॥ सा जगाद महीनाथ । प्रतिज्ञेयं मया कृता ॥ म-
मैषः पतिरेवास्तु । जन्मन्यस्मिन्नसंशयं ॥ ४० ॥ एवमस्त्विति राज्ञोक्ते । ध्वजोऽवोच-
न्नृपंप्रति ॥ स्वामिन् किंचित्पंचकुल-पार्श्वाद्द्रव्यं ममास्ति हि ॥४१॥ कृत्वा प्रसादं तद्दे-

व । दाप्यतां त्वरितं मम ॥ ततो राजापि तत्पंच—कुलमाकार्य चोचिवान् ॥४२॥ यद्दातव्यं ध्वजस्यास्ति । युष्माभिः शीघ्रमेव तत् ॥ दीयतां ह्यधिकं निंद्य—मृणं सद्भिः प्रकीर्तितं ॥ ४३ ॥ ततः पंचकुलेनाशु । प्रणिपत्य स आदरात् ॥ विज्ञप्तो नो महाभाग । श्रूयतां वचनं हितं ॥ ४४ ॥ अस्त्यस्मद्गृहसर्वस्वं । त्वदायत्तं परं हि नः ॥ कुटुंबं जीवति यथा । कृपां कृत्वा तथा कुरु ॥ ४५ ॥ ततः स कृपया तेषा—मर्धं जग्राह नीतिवित् ॥ राजाप्यदापयत्तस्य । तांबूलं सुप्रसादवान् ॥ ४६ ॥

तांबूलं कटु १ तिक्त २ मुष्ण ३ मधुरं ४ क्षारं ५ कषायान्वितं ६ । पित्तघ्नं ७ कफनाशनं ८ कृमिहरं ९ दुर्गंधनिर्नाशनं १० ॥ वक्त्रस्याभरणं ११ विशुद्धिकरणं १२ कामाग्निसंदीपनं १३ । तांबूलस्य सखे त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः ॥ ४७ ॥ अथ राज्ञा विसृष्टोऽसौ । तया गणिकया सह ॥ जगाम तद्गृहं शश्व—द्भवद्धवलमंगलं ॥ ॥ ४८ ॥ निश्चिंतः स तया सार्धं । विललास यथासुखं ॥ श्रियेव कृष्णो रत्येव । कामः

शच्येव वासवः ॥ ४९ ॥ तमाह गणिकान्येद्यु-र्गम्यते त्वत्पुरे प्रिय ॥ कौतुकं मे महद-स्ति । त्वदीयपुरवीक्षणे ॥ ५० ॥ सोऽवादीत्प्रथमं गत्वा । गृहचिंतां करोम्यहं ॥ तत-स्त्वदानयनाय । प्राहिणोमि यदा नरान् ॥ ५१ ॥ तदा त्वया समेतव्य-मित्युदित्वा त-तोऽचलत् ॥ साह विस्मारणीयाहं । न कदापि त्वया प्रिय ॥ ५२ ॥ यतः—स्मर्तव्योऽ-हं त्वया मित्र । न स्मरिष्याम्यहं पुनः ॥ स्मरणं चेतसो धर्म—स्तच्चेतस्तु त्वया हृतं ॥ ॥ ५३ ॥ तं वृक्षं सोऽगमत्तेन । यत्र लेभे सुराहरः ॥ स प्राग्दत्तं वरं यद्वात । कृत्वा ब-लिमयाचत ॥ ५४ ॥

गुह्यकोऽथोऽवदद्भद्र । वरं वृणु यथेप्सितं ॥ कल्पांतेऽप्यन्यथा न स्यात् । प्रतिपन्नं सतां वचः ॥ ५५ ॥ सोऽवक्कुरु पुरं चारु-धनधान्यसमृद्धिभृत् ॥ अश्वेभरथयोधाढ्यं । गृहाट्टश्रेणिसुंदरं ॥ ५६ ॥ ततश्चकार स सुरो । नाम्ना सुरपुरं पुरं ॥ स्फुर्जत्संपत्पराभूत-स्वःपुरं पौरसंकुलं ॥ ५७ ॥ अथ ध्वजेन स्वजन—स्तत्र मात्रादिकोऽखिलः ॥ आ-

निन्ये देवदत्तापि । संप्रेष्य निजपूरुषान् ॥ ५८ ॥ यतः—प्राप्य चलानधिकारान् । शत्रुषु मित्रेषु बंधुवर्गेषु ॥ नापकृतं नोपकृतं । न सत्कृतं किं कृतं तेन ॥ ५९ ॥ तत्र ध्वजभुजंगाख्यो । नृपो विविधभंगिभिः ॥ भोगान् दयितया सार्धं । बुभुजे देवदत्तया ॥ ॥६०॥ अन्येद्युस्तत्पुरोद्याने । श्रीयशोधरसूरयः ॥ वाचंयमव्रातसेव्या । ज्ञानिनः समुपागताः ॥ ६१ ॥ तदागमनमाकर्ण्य । सपौरः पृथिवीपतिः ॥ आगत्य गुरुपादाब्जं । नत्वोपाविशदग्रतः ॥ ६२ ॥

गुरुभिर्ज्ञानगुरुभि–र्देशना क्लेशनाशिनी ॥ प्रारेभे भव्यजंतूनां । प्रतिबोधविधायिनी ॥ ६३ ॥ पावेण होइ असुहं । धम्मेण सुहाण होइ संपत्ति ॥ इअं तुमं चिअ नरवर । पयमं चिअ निसुणूदाहरणं ॥ ६४ ॥ जं पुव्वं दालिद्दं । पावफलं आसितं तुह नरिंद ॥ संपत्तं पुण्णफलं । जाया इह रज्जसंपत्ति ॥६५॥ राजाब्रवीत्कथमिदं । जजल्प गुरुपुंगवः ॥ इहैव भरते ग्रामः । सुग्रामाख्योऽभवत्पुरा ॥ ६६ ॥ तत्रासीच्चंम्पालाख्यः । प-

ल्लीपतिरनीतिकृत् ॥ ग्रामभंजननिष्णातः । सार्थलुंटनतत्परः ॥ ६७ ॥ सात्काकर्षणं स्त्रीणा–मपि यः कुरुतेतरां ॥ महेभ्यानां मंदिरेषु । खात्राणां खननं तथा ॥ ६८ ॥ अन्यदा साधवस्तत्र । बहवः समुपागताः ॥ तान् दृष्ट्वा चापमारोप्य । स पल्लीशः प्रधावितः ॥ ॥ ६९ ॥ जगौ च मुंडा वस्त्राणि । रेरे त्यजत वोऽन्यथा ॥ अधुना मारयिष्यामि । नेष्यामि यममंदिरे ॥ ७० ॥ तावच्छासनदेव्या स । स्तंभितो विस्मितोऽभवत् ॥ दीनवाक्यं वदन् सोऽथ । तयामोचि दयावशात् ॥ ७१ ॥ साधवस्तं तदावोचन् । हिंसादि खलु पातकं ॥ दुरंतदुःखदं भद्र । मा कुरु श्वभ्रकारणं ॥ ७२ ॥ यतः—

वहमारणअब्भक्खाण–दाणपरधणविलोवणाईणं ॥ सव्वजहन्नो उदउ । दसगुणिउ इक्कयाणं ॥ ७३ ॥ तिव्वयपरे पउसे । सयगुणिउ सय सहस्स कोडिगुणो ॥ कोडाकोडिगुणो वा । हुज्ज विवागे बहुतरो वा ॥ ७४ ॥ इत्यादिदेशनां श्रुत्वा । प्रतिबुद्धोऽथ सोऽग्रहीत् ॥ अदत्तादानविरतिं । स्थूलां गुर्वंतिके मुदा ॥ ७५ ॥ पल्लीं नीत्वा स

सुगुरून् । चीवरैः प्रत्यलाभयत् ॥ साधुदानप्रभावाच्च । शुभं कर्म समार्जयत् ॥ ७६ ॥
आयुः प्रपूर्य तत्पुण्यात् । सत्वं जातो महीपतिः ॥ प्राग्लोकत्रुटनाद्दौःस्थ्यं । तवाभूदति-
दुःखदं ॥ ७७ ॥ यत्तु सूरिभवैर्वेद्यं । प्राक् दुःकर्म समार्जितं ॥ धर्मश्रद्धावशाद्भूप । तद-
पि क्षपितं त्वया ॥ ७८ ॥ गुरुवाक्यमिति श्रुत्वा । जातिस्मृतिमवाप्तवान् ॥ श्रावकत्वं च
विधिवत् । प्रपेदे वसुधाधिपः ॥७९॥ गुरुं प्रणम्य स्वगृहं । ययौ भूपस्ततश्चिरं ॥ धर्ममा-
राध्य मृत्वासौ । सौधर्मे त्रिदशोऽजनि ॥ ८० ॥ ध्वजभुजंगकथानकमद्भुतं । वसनदान-
फलप्रतिपादकं ॥ इति निशम्य जना वसनार्पणं । कुरुत भक्तिभराद् व्रतिनां सदा ॥८१॥
इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकन-
ककुशलगणिविरचिते दानप्रकाशे वस्त्रदाने ध्वजभुजंगवृत्तांतरूपः सप्तमः प्रकाशः स-
माप्तः ॥ श्रीरस्तु ॥

॥ अथाष्टमः प्रकाशः प्रारभ्यते ॥

अथ चारित्रिणां चारु-पात्रदानं मनीषिणा ॥ श्रद्धया धनपतिव-द्दातव्यं तत्कथा यथा ॥ १ ॥ जंबूद्वीपेऽत्र भरते । नाम्नाचलपुरं पुरं ॥ द्विधाप्यत्र सूरतेजा । नाम्ना धाम्ना नृपोऽभवत् ॥ २ ॥ श्रेष्ठी धनपतिस्तत्र । वसतिस्म महर्द्धिकः ॥ राजमान्यो भुवि ख्यातो । दयादाक्षिण्यशोभितः ॥ ३ ॥ कस्यापि निःस्ववणिजः । पार्श्वाद् द्रव्येण भूरिणा ॥ भूमिभागं स जग्राह । शोभनं जनसाक्षिकं ॥ ४ ॥ तत्रान्यदा निवासार्थं । पीठबंधाय भूतले ॥ खन्यमाने भृत्यवर्गै-र्निरगान्निधिरद्भुतः ॥ ५ ॥ स्वर्णकच्चोलकस्थाल-कलशैर्मणिभिर्भृतं ॥ जग्राह तं धनपतिः । प्रहृष्टहृदयोऽधिकं ॥ ६ ॥ तद्भूमिपूर्वनाथेन । विज्ञाय निधिनिर्गमं ॥ प्रोक्तं धनपतेरेष । मदीयोऽयं महानिधिः ॥ ७ ॥ यतो मत्पूर्वजैरस्यां । भूमौ गुप्तीकृतो ह्ययं ॥ बभूव मयका लभ्यो । निधिरेष ततः खलु ॥ ८ ॥ तदावोचद्धनपतिः । कल्ये राजकुले किल ॥ आवयोर्भविता न्यायो । नृपधीसखसाक्षिकं

॥ ९ ॥ यत्किंचिद्‌भूपतिर्भद्र । कथयिष्यत्यसंशयं ॥ नस्तत्प्रमाणमित्युक्त्वा । स विसृष्टो गृहं ययौ ॥ १० ॥ तस्यामेव हि यामिन्यां । दष्टो दुष्टेन भोगिना ॥ म्रियतेस्म क्षणे-नाय-महो विधिविजृंभितं ॥ ११ ॥ यतः—सूलविसअहिविसूइ-पाणिअसत्थग्गिसंभमेहिं च ॥ देहंतरसंकमणं । करेइ जीवो मुहुत्तेणं ॥ १२ ॥

भग्नाशस्य करंडपीडिततनोर्ग्लानेंद्रियस्य क्षुधा । कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥ तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातो यथा—स्वस्थस्तिष्ठति दैवमेव हि नृणां वृद्धौ क्षये चास्त्यलं ॥ १३ ॥ ततः प्रोचे जनैरेव—मसौ हि धनलोभतः ॥ अलीकमुक्तवांस्तद्धि । विना पुण्यं धनं कुतः ॥ १४ ॥ अन्यथा सौवगेहेऽपि । विद्यमानं घनं धनं ॥ कथं न लब्धं दारिद्र्यो—पद्रुतेनामुना स्फुटं ॥ १५ ॥ दूरस्थोऽपि धनपति—र्निधिं प्राप श्रमं विना ॥ पुण्योदये नराणां हि । न स्यात्किं किं समीहितं ॥ ॥ १६ ॥ पुन्नोदएण लद्धो । धणवइणा कणयन्नायणुक्केरो ॥ कह एएणं लोह—ग्घत्थेण

स तीरए घित्तुं ॥ १७ ॥ पिशुनः कोऽपि वृत्तांतं । तमाख्यायेति नूपतिं ॥ प्रोचे स्वामिनि वित्तस्य । मृते राज्ञो धनं नवेत् ॥ १८ ॥ ततो राजा तमाहूय । वृत्तांतं पृष्टवानथ ॥ स यथास्थितमाचख्यौ । तत्सर्वं बुद्धिशोजितः ॥ १९ ॥ यतः—सत्यं मित्रैः प्रियं स्त्रीजि–रलीकमधुरं द्विषा ॥ अनुकूलं च सत्यं च । वक्तव्यं स्वामिना सह ॥ २० ॥ तस्य सत्यं वचः श्रुत्वा । प्रहृष्टः पृथिवीपतिः ॥ सस्मार नीतिशास्त्रस्य । वचनं नीतिवित्तमः ।२२।

अनादेयं न गृह्णीयात् । परिक्षीणोऽपि पार्थिवः ॥ आदेयं न समृद्धोऽपि । सूक्ष्ममप्यर्थमुत्सृजति ॥ २३ ॥ इत्थं नृपेण सन्नीतिं । स्मरता तस्य तद्धनं ॥ प्रदत्तं सोऽपि विलस–त्यलं तेन निरंतरं ॥ २४ ॥ अन्यदा तत्पुरोद्याने । सुरासुरनमस्कृतः ॥ आययौ केवली कश्चि–द्भव्यबोधनतत्परः ॥ २५ ॥ तदागमनमाकर्ण्य । राजा श्रेष्ठी जनोऽखिलः ॥ आगत्य नक्त्या तं नत्वा । निषेदुः पुरतः प्रभोः ॥ २६ ॥ राजावक्रेन पृथ्थेन । श्रेष्ठिनोऽस्य महात्मनः ॥ सुवर्णपात्रसंप्राप्तिः । संजाता रत्नसंयुता ॥ २७ ॥ इतरेणाप्यकाले हि

। सर्पतो मरणं कथं ॥ प्राप्तं विश्वत्रयीनाथ । निवेदय दयापर ॥ २८ ॥ केवल्यूचेऽत्र
भरते—ऽभवत्कर्णावती पुरी ॥ कुटुंबिनौ द्वौ वसत—स्तत्र भिन्नगृहे स्थितौ ॥ २९ ॥ त-
त्रैकस्य गृहे वाचं—यमा आययुरन्यदा ॥ नवदीक्षितपात्रार्थं । सर्वं स्याद्यचितं यतः ॥
॥ ३० ॥ गृहाधिपेन साधूनां । सत्पात्रं प्रासुकं ददे ॥ तदा कार्यवशादागा—दितरो-
ऽपि तदालयं ॥ ३१ ॥ अवदच्चेति भो मुग्ध । रम्यं पात्रं गृहान्मुधा ॥ दुर्लभं निर्ग-
मयसि । त्वं किं मुंडार्पणेन हि ॥ ३२ ॥ आद्येन पुण्यमन्येना—ऽपुण्यं बहु समार्जितं
॥ ततः क्रमादुभौ मृत्वा । जातावेतौ महीपते ॥ ३३ ॥ अत एकेन पुण्यस्य । द्वितीये-
नाशुभस्य च ॥ फलं प्राप्तं महीपाल । प्रत्यक्षं भवतस्त्विदं ॥ ३४ ॥ इति श्रुत्वा गुरुवचो ।
जातिस्मृतिरजायत ॥ श्रेष्ठिनो हि धनपतेः । शुभाशयवशादथ ॥ ३५ ॥

पात्रदानं हि साधूनां । दातव्यं समये सति स इत्यभिग्रहं श्राद्ध—धर्मं च प्रतिपन्न-
वान् ॥ ३६ ॥ गुरुं नत्वा ययौ गेहे । चिरं धर्मं प्रपाल्य सः ॥ मृत्वा समाधिना चांते म-

हर्द्धिरमरोऽभवत् ॥ ३७ ॥ ततश्च्युत्वा मनुष्यत्वं । प्राप्य चारित्रमुत्तमं ॥ आराध्य क्षीण-
कर्मा द्राग् । निर्वाणं गतवानसौ ॥ ३८ ॥ धनपतेरिति चारुकथानकं । किल निशम्य
चमत्कृतिकारकं ॥ सुमुनिपात्रजनदानविधौ जनाः । कुरुत यत्नमिहैव महोद्यताः ॥३९॥
इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वरशिष्यश्रीसोमकुशलगणिशिष्यपंडितश्रीकन-
ककुशलगणिविरचिते दानप्रकाशे पात्रदाने धनपतिकथाकथनोऽष्टमः प्रकाशः समाप्तः ॥
॥ श्रीरस्तु ॥ श्रीमत्तपागणनभोंगणपद्मबंधु—र्योग्यादकब्बरमहीरमणादवाप्तां ॥ ख्यातिं ज-
गद्गुरुरिति प्रथितां दधानः । सश्रीकहीरविजयाभिधसूरिरासीत् ॥ १ ॥ तत्पट्टे वरगुणमणि—
गणरोहणभूधरा धरापीठे ॥ सांप्रतमद्भुतयशसो । विजयंति विजयसेनसूरिवराः ॥ २ ॥
वाचकचूडामणयः । श्रीमंतः शांतिचंद्रनामानः ॥ विद्यागुरवो विबुधा । विजयंतां कम-
लविजयाश्च ॥ ३ ॥ एषां श्रीसुगुरूणां । प्रसादतः कायबाणरसचंद्रैः ॥ प्रमिते वर्षे रचितो ।
ग्रंथोऽयं कनककुशलेन ॥ ४ ॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ इति श्रीदानप्रकाशः समाप्तः ॥